

॥श्रीगणेशायनमः॥ वेदैकवेद्यंभक्तेष्टदायिनंप्रत्यगद्वयं सत्यादिलक्षणंसांबंसंभजेसर्वका
रणं॥ वेदसांवेद्यमस्मादिवेभवंयत्प्रसादतः॥अविद्यंभजेश्रीमज्जगद्गुरुसरस्वतीं॥श्रुत्या
चार्यादिवाक्योघरसायननिषेवणात्॥सिद्धबन्मोहतत्कार्यवल्मीकछिनवर्जितः॥क्षणेक्षणे
कलेर्हेतुःसाक्षिणाहंपिनाकिना॥भक्त्याचप्रेरितोवक्ष्येपुरुषार्थप्रबोधकं॥श्रुतिस्मृत्यादिनि
खिलशास्त्राभिप्रायभासकं॥सर्वज्ञसंतोषकरमज्ञसर्वज्ञताप्रदं॥श्रुद्धवैदिकइत्येकःपरस्तां
त्रिकवैदिकः॥श्रुद्धतांत्रिकइत्यन्योपरोवैदिकतांत्रिकः॥एतेचत्वारआत्मज्ञाःस्वस्वकर्मानुसा
रतः॥मार्गाधिकारिणःप्रोक्ताःशिवेनपरमात्मना॥तंत्रगंधंनसहतेयःसोयंश्रुद्धवैदिकः॥सतं
त्रंश्रुतिप्रीतःप्रोक्तस्तांत्रिकवैदिकः॥वेदगंधंनसहतेयःसोयंश्रुद्धतांत्रिकः॥सवेदांगागमः
प्रोक्तोयोसौवैदिकतांत्रिकः॥वेदवेदानुकूलेचाधिकारीश्रुद्धवैदिकः॥तंत्रोपसर्जनेशास्त्रेऽधि
कृतांत्रिकवैदिकः॥वेदगंधासहतंत्रेधिकारीश्रुद्धतांत्रिकः॥वेदोपसर्जनेतंत्रेऽधिकृद्वैदिक
तांत्रिकः॥श्रुद्धवैदिकएवाधिकार्यस्मिन्ग्रंथउच्यते॥अन्येषामधिकारोत्रत्रयाणांनैवविद्यते॥

ससूतसंहितेमज्ञागधेयंतुपरासरं॥श्रुद्धवैदिकमित्युक्तंविद्वद्भिःश्रुद्धवैदिकैः॥शिवरा
वसंवादवायवीयादिकंबुधैः॥वेदागमविभागज्ञैःप्रोक्तंतांत्रिकवैदिकं॥वेदगंधासहंतंत्रं
सोमपाश्रुपतादिकं॥श्रुद्धतंत्रमितिप्रोक्तंवेदतंत्रार्थकोविदैः॥यंचराजंभागवतंशैवसिद्धांत
संज्ञितं॥सर्वमेतन्महाप्रोक्तंवैदिकतांत्रिकं॥पाणिनीयंजैमनीयंशास्त्रंवेयासिकंतथा॥भाष्यं
यज्ञगवत्यादेःप्रोक्तंप्राज्ञैःतच्छुद्धवैदिकं॥अक्षपादीयकाणादकापिलानितथैवच॥पातंजलं
चतत्सर्वंप्रोक्तंतांत्रिकवैदिकं॥शारदातिलकंतद्वन्मंत्रदेवप्रकाशिकाप्रपंचसारंवाशेषंप्रो
क्तंवैदिकतांत्रिकं॥सिद्धशास्त्रंशिवप्रोक्तंषडाम्नायविवर्जितं॥हवमंत्रलयक्रोधरोधव्यापा
साधनं॥ज्ञाननाश्यानादिभावश्रद्धाज्ञाननिषेधकं॥श्रुद्धतंत्रमितिप्रोक्तंविद्वद्भिःसूक्ष्मदर्शि
भिः॥असांकर्यायमार्गाणांमार्गिणांचपरस्परं॥मयाशिवप्रेरितेनविभागोत्रप्रदर्शितः॥स्वस्व
सिद्धांतशास्त्रावारानज्ञात्वैवयेनराः॥सांकर्यणैवचर्तंतेसदानिरयालयाः॥सिद्धांतशैवसौमा
ख्यसंहितायांनथोदितं॥श्रुद्धपाशुपतंसोमनाकुलंचचतुर्विधं॥तंत्रभेदःसमाख्यातःसंकरंन

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

समाचरेत्। एकनदीस्नानेनकुर्यात्स्थापनक्रियां। स्थापनंवान्यतंत्रेणतंत्रसंकरउच्यते।
तंत्रसंकरदोषेणराजराष्ट्रंविनश्यति। तस्मात्सर्वप्रयत्नेननकुर्यात्तंत्रसंकरं। उक्तलक्षणमा
र्गाधिकारिणःसंतिनोकळो। बहवःसंतियाषंडामार्गसंकरकारिणः। तंत्रसंबंधिनःसर्वमा
र्गसंकरकारिणः। ऊचुरेतेभ्यस्तत्संगिसंगिसंगात्बिभेम्यहं। वेदोत्कर्षंचवेदार्थज्ञानोत्कर्ष
तथैवच। तन्मूर्त्तिनामस्थानार्चाप्रसादानांचवैभवं। गुरुरुद्रस्यचोत्कर्षंभस्मरुद्राक्षधारणं। ७८
प्रामाण्यंसर्वमार्गाणांवक्ष्येहंशिवचोदितः। श्रीमद्भिर्भगवत्पादैःश्रीविद्यारांकरेश्वरैः। श्रीविद्या
रण्यसंज्ञैःश्रीभारतीतीर्थदेशिकैः। अन्यैरप्यखिलाचार्यैःसर्वज्ञैर्वैदिकोत्तमैः। करुणासागरै
र्लोकानुग्रहार्थात्तविग्रहैः। अनुक्तांस्तस्मरुद्राक्षरुद्रोत्कर्षादिवर्णनं। विद्वद्भिर्नपरिग्राह्यमिति २
वदंतिवैदिकोत्तमैः। श्रुतिस्मृतिपुराणादिसिद्धंभस्मादिकंयतः। तत्त्यागिनांवाविद्वत्त्वंवैदिकत्वंच
नावदत्। यदनुक्तत्वमार्गेणभस्मादेस्त्यजतांनृणां। विद्वत्त्ववैदिकत्वंवाचैवाहोशाभततरां।
श्रुत्यादिसिद्धभस्मादीन्यदनुक्तत्वतस्त्यजन्। वैदिकोत्तमविद्वद्भिर्दीयतेप्रियउच्यते। श्रुति

स्मृतिविरुद्धाया। विद्वद्वैदिकतातुसा। कळोयद्वाऊर्जाक्षावात्सर्वत्राहो। विराजते। कळोसद्वा
ऊर्जाक्षावादभावात्पुरुषार्थिनां। विराजतेतिसद्भत्वंविद्वद्वैदिकतासदा। विश्वयसवैविशंसः
स्यातिलाक्षादितत्परः। अतोविराजतेदंभविद्वद्वैदिकताकळो। श्रुतिस्मृत्यनुकूळापिदंभा
दंभविवर्जिता। नराजतेससांशुद्धविद्वद्वैदिकताकळो। ज्ञानलेशाळवांशांशेळाभगर्वाद्यमा
नसान्। कोवारंतयितुंशक्तोवैदिकाशिरोमणे। बोद्धारोमत्सरग्रस्ताःप्रभवस्मयदूषिताः। ते५
अबोधोपहताश्चान्येजीर्णमंगेसुभाषितं। अज्ञःसुखतरमाराध्यःसुखतरमाराध्यतेविशे
षज्ञः। ज्ञानलवदुर्विदग्धंब्रह्मापिनतरंनरंजयति। नवाचैवंभर्तृहरिर्विद्वज्जनशिरोमणिः।
नरंजयितुमुद्यक्तोदुर्विदग्धान्हंततः। दुर्विदग्धास्तमग्रंथमंगीकुर्वंतुवानवा। सर्वज्ञाज्ञानि
सद्वोविषयेत्राहमुद्यतः। युक्तियुक्तमुपादेयंवचनंबाळकादपि। अन्यत्तृणमिवत्याज्यमपि
क्तंपद्मजन्मना। अणुभ्यश्चमहद्भ्यश्चशास्त्रेभ्यःकुशळोनरः। सर्वतःसारमादद्यात्पुष्पेभ्यइव
षट्पदः। संस्कृतैःप्राकृतैर्वापिदृष्टत्वेनकृतकेनवा। पुंसांयेनोपदिश्यतेतच्छास्त्रमभिधीयते।

वणान्वाश्रयेलामंमाहिषाणिदधीनिवायुक्तियुक्तंवचोग्राह्यंननुपौरुषगोरवात्।पुराण
मित्येवनसाधुसर्वंनचापिकाव्यंनवमित्यवद्यं।संतःपरीक्ष्यान्यतरद्भजंतेमूढःपरप्रत्ययने
यबुद्धिः।शिखादिधारणंसर्वाचार्यैःकुत्रापिनोदितं।अविपाळसुबुद्धेतदपित्यज्यतांत्व
याशिखायज्ञोपवीतादिधारणंस्मृतिचोदितं।इतिचेत्यत्यक्षवेदसिद्धंभस्मादिधारणं।
संध्यावंदनवन्नित्यंभस्मरुद्रार्चनादिकं।श्रुतिस्मृतिपुराणादौसंघुष्टंनिश्चितंतत्कदापि
ननिषिद्धंतरूर्ध्वपुंड्रादिवत्क्वचित्।इतिमत्वाविळाचार्यग्रंथोचनकृतःपशो।प्रत्यवायस्त्व
करणेस्यात्संध्यावंदनस्यचेत्।भस्मधारणरुद्रार्चाद्यभावेपितथानकिं।परहंसानिहत्यंय
त्नाद्बाह्यंप्रकीर्तितं।परहंसानुवृत्तंयत्तध्येवांतरमुच्यते।श्रुत्येवोक्तंयतेःसंध्यावंदनंत्याज्य ३
मित्यपि।तयैवोक्तंयतेर्भस्मधारणेशार्चनादिकं।संध्योपास्तिविधिर्नैवयदिशास्त्रेप्रदर्श्य
ते।भस्मादिधारणंविधिर्जीबाळादौप्रदर्श्यते।संध्यास्त्वेषंसमाधौयतिरात्मनिभज्यत्व।
भेदभक्षणमेवास्यसंध्येतिश्रुतिशासनात्।यतेःपरमहंसस्यसंत्यक्ताशेषकर्मणः।सर्गा

यत्रीनुहंसांतासंध्योपास्तिर्नविद्यते।विश्वहंज्ञानमुत्पन्नंयस्यतस्यमहात्मनः।शिवरुद्म
हादेवब्रह्मेशानादिनामसुरुद्रमूर्त्तिषुसर्वासुशांतिदांत्यादिसाधने।तिर्यक्पुंड्रंरुद्राक्ष
तथाभस्माचगुंठने।शिवस्यलिंगपूजायांशिवस्थानेषुसुव्रताः।प्रियबुद्धिःप्रजायतेस्वभा
वादेवसर्वदा।यस्यविज्ञानिनस्तेषुप्रद्वेषोनोपिजायतेऽपेक्षावानसज्ञानिपशुर्विज्ञान
वर्त्तितः।सर्वत्रनास्तिविद्वेषःसाध्येसाधनएवकः।साक्षाद्विज्ञानिनोविप्राऽपेक्षाबुद्धिरवर्त्तते।
तथापुंक्तेषुसर्वेषुशैवेषुद्विजपुंगवाः।प्रियबुद्धिःस्वतोभातिबाधितोकाररूपतः।बाधितोका
रतोवापियस्यबुद्धिःस्वतोनहिएषसोनैवविज्ञानीभ्रांतएवनसंशयः।स्वकीयसंहितायांतु
सूतेनाप्येवमीरितं।विद्वत्त्वेवानुवृत्तत्वंभस्मादेःपरिकीर्त्तितं।सूतेनपरहंसानुवृत्तत्वंनेति
चेत्यशो।परहंसोगुणातीतोविद्वान्ब्राह्मणइत्यपि।एतांश्छब्दांस्तुपर्य्यायान्बुधास्तत्तत्थो
क्तवान्।ईशानविषयज्ञानंवेदांतश्रवणादिनाजायतेपरहंसस्ययतेर्मुख्याधिकारिणः।
नाश्रमांतरनिष्ठस्यक्रमात्तस्यापिजायते।इत्येवंतेनसूतेनवक्तुंशक्यंनचान्यथा।संन्यासपि

क्तेतद्दहिधतेवैणवेपित्रदंडेनैवैकदंडित्वंमुख्यंज्ञानंविनाभवेत्।मुख्यंपरमहंसत्वंज्ञान
दंडिनएवहि।ज्ञानदंडोधतोयेनेत्यादिवेदांतमानतः।किंबहूक्त्यास्वयंशंभुर्भस्मरुद्रा
धारणं।करोतितस्मात्तद्भस्मादंतरत्वंतुसंस्थितं।विद्वच्छिवानुवृत्तत्वादंतरस्यशमादि
संध्योपास्त्यसमानत्वंभस्मादेर्भूषणंहिनः।विद्वच्छिवानुवृत्तंयद्भस्मादिभवभेषजं।तत्सर्व
क्रमित्येवत्यजत्वंसाहसिकोत्तमः।श्रुतिस्मृतिपुराणादिसत्प्रमाणेत्रसत्यपि।एवंनुक्तत्वा
स्मृत्यजतेविदुषेनमः।भस्मादीनामसिद्धावएवंचार्यैरनुक्तता।तात्पर्यसंग्रहकृतावेदा
न्तवर्णितः।वेदवेदांतभस्मादिस्थापनादिपटीयसी।श्रीविद्यारण्यगुरुभिर्योख्यातास्तत्
संहितास्तोत्रसंहितासाध्वीमन्निधानंपराचारं।पुराणद्वयमेतत्तुवेदरत्नकरंडकं।वि
वत्सेतुमध्यस्थसद्दृज्जनसंमतैः।स्वल्पभस्ममहाभस्मवेदस्थापनतत्परैः।सर्वज्ञैःकरुणा
वासेर्लोकानुग्रहविग्रहैः।मन्मथमोहनीहारघनमध्याह्नभास्करैः।मनोवाग्दूरविद्रूपदेवीदे
मनोहरैः।श्रीपाणिपात्रगुरुभिर्भस्माद्याव[illegible]ताभ्रशं।वारंवारुद्रदेवीविद्यासागरैःज्ञातमान

[illegible]

[illegible]स्तिः।सरस्वत्यंतविबुधराजशाह्वाभिधैरपिभस्माद्यावर्णितात्रशास्त्रतात्पर्यज्ञैर्मुनीश्वरैः।एवं
चारःप्रमाणंचेन्नतथानेतिकोवदेत्।ऋषयःखल्वनःसर्वेस्तेसर्वेश्रुतवेदिकाः।रुद्राक्षमालाभस्म
रणास्त्रिपुंड्रांकितमस्तकाः।शिवलिंगार्चनपराःशिवशब्दजपेरताः।पित्राचारःप्रमाणंचेद्ष
ळंगमनादिकं।वृषळीपतिपुत्रेणकृतोनक्रियतेपशो।सदाश्रुतिस्मृतिविरुद्धाचारेकपरा
यणाः।सत्सुतेतिसदोमध्येकथनंपितृषणं।देशजातिकुळाचारःप्रमाणंचेदहोतव।विद्व
द्विदिकताभंगपुछभ्रूण्यद्विपत्यशो।देशजातिकुळाचारमंगीकृत्यातिमोहितः।श्रुत्यादिविहि
ताचारंसंत्यजन्पशुर्नकिं।संप्रदायःप्रमाणंचेच्छत्याद्यैःसविरुध्यतेयदितत्संप्रदायायदूर
दूरेनमोनमः।यद्यदाचरतिश्रेष्ठइतिकृष्णवचोबलात्।शिष्टाचारःप्रमाणंचेदस्तुचेच्छिस्म
तः।परदारार्थचंडत्वसिद्धकमळोद्भवाः।विज्ञानेश्वरमुख्याश्चश्रुत्यसंमतकारिणः।प्रबळेछा
रत्नवेगापस्मारपरिपीडिताः।परदारस्वहितृगंतारःकाममोहिताः।एतेतिशिष्टाइत्यत्रसं
देहःकस्यवाप्तवेत्।तथापितत्तदाचारःप्रमाणंकिंवदाद्यनः।शिष्टसंबंधितेसर्वप्रमाणंचेद्वि

ऽाधम। विष्णुभक्तस्यांडकोशाश्रीमद्भस्मकुतोनतेअज्ञानात्तादृशाचारःप्रत्यवायस्यकारणं।ते
षांयथेष्टचरणंप्रमाणंविदुषांयदि।शिवावतारैःसर्वज्ञैःलोकानुग्रहतत्परैः।दैवप्राप्तसदाचा
रैःब्रह्मिष्ठैःश्रुतवैदिकैः।तैरेवकृपयासोयपत्रिकंवमहात्मभिः।श्रुतिस्मृतिपुराणादीसाद
रंतत्ववेदिनां।बुद्ध्यायथेष्टचरणंतत्रतत्रनिराकृतं।व्यवहारकृतैःस्वस्वासदाचारोपिनिंदि
तः।अस्माकमप्यहोपापारह्यमस्तीतिऽर्जयं।अतस्तेषामनाचारःप्रमाणंविदुषांकथं।बुद्ध्वादृ
तसतत्वस्ययथेष्टचरणंयदि।श्रुनांतत्वविदांचैवकोभेदोश्वविप्रवृषे।अधर्माज्ञायतेज्ञा
नंयथेष्टचरणंततः।धर्मकार्यंकथंतत्स्याद्यत्राधर्मोविनेष्यते।प्रत्यक्षाणाभ्याहातोयथेष्ट
चरणंहरिः।यस्यसर्वसमारंभाःप्रकाशंचेतिसर्वदृक्।योहियत्रविरक्तःस्यान्नासौतस्मेप्रव
र्त्तते।लोकत्रयादिरक्तत्वान्मुमुक्षुःकिमितीहते।क्षुधयापीड्यमानोपिनविषंघस्तुमिच्छति।म
ह्यान्धस्तत्रज्ञानंनामूढस्तज्जिघृक्षति।रागोलिंगमबोधस्यचित्तव्यायामभूमिषु।कुतःशाठ्
यतातस्ययस्यानिःकोटरेतरोः।इत्येवंनेधर्म्यसिद्धोब्रह्मांशेब्रह्मवित्तमैः।श्रुतिस्मृतिपुराणेति

त्या२

हासतात्पर्यकोविदैः।श्रीमद्भिर्विश्वरूपाख्यैराचार्यैःकरुणार्णवैः।विद्वद्यथेष्टचरणंसंभ्रमेणनि
राकृतं।यथेष्टचरणप्राप्तिःसन्यासादिविधौकृतः।इतिश्रीभगवत्पादाचार्यैश्चैतन्निराकृतं।
आरब्धकर्मप्राबल्याद्भोगेच्छाप्यवशादपि।क्लिश्यन्नेवसदाप्येवभुंक्तेविशिष्यहीतत्वत्।भुंजा
नाअपिबुधाःश्रद्धावंतःकुटुंबिनः।नाद्यापिकर्मनःछिन्नमितिक्लिश्यंतिसंततं।नायंक्लेशा
त्रसंसारतापःकिंतुविरक्तता।भ्रांतिज्ञाननिदानोहितापःसांसारिकःस्मृतः।विवेकेनपरि
क्लिश्यन्नल्पभोगेनतृप्यति।अन्यथानंतभोगेपिनैवतृप्यतिकर्हिचित्।जीवन्मुक्तिरियंमास्तु
न्मास्तावेत्तहंकृती।तर्हिजन्मापिनेस्त्वेवस्वर्गमात्रात्कृतीभवान्।स्यातिज्ञायदोषेणस्व
र्गहेयोयदातदा।स्वयंदोषतमात्मार्थैःकामादिःकिंनहीयते।तत्तंबुधापिकामादिनिःशेषेण
ज्ञात्वासिद्धेत्।यथेष्टाचरणंतेस्यात्कर्मशास्त्रादिलंघिनः।बुद्ध्वाद्वैतसतत्वस्ययथेष्टचरणंयदि।
श्रुनांतत्वविदांचैवकोभेदोश्वविप्रवृषे।बोधात्पुरामनोदोषमात्रात्क्लेशस्तथाधुना।अतो
श्लोकानिराचेत्यहोतेबोधवैभवं।विद्वद्राहादितुल्यंमाकार्षीत्त्वंविज्ञवान्।सर्वदोषसं

त्यागान्नोकैःसंपूज्यदेववत्।काम्यादिदोषदृष्ट्याद्याःकामादित्यागहेतवः।प्रसिद्धामोक्षशास्त्रे
षुतानत्विष्यसुरवीभव।इतिश्रीभारतीतीर्थमुनिभिःकरुणाकरैः।विद्यथेष्टावरणंतत्रतत्रनि
राकृतं।काम्यानुष्ठानकाळेपियथेष्टवरणंयतः।संत्यक्तंतत्रतोमद्ज्ञानाद्यर्थंकथंभवेत्।
चंडाळगेहेविप्राणांगहेवापरमार्थवित्।भक्ष्यभोज्यादिवैषम्यंनकिंचिदपिपश्यति।स्वपूर्ण
मशिवानंदप्रकाशबळतःपुमान्।स्वछंदंवर्त्ततेलोकेकोवातस्यनिवारकः।सार्वभौमोयथा
राजास्वछंदंवर्त्ततेभुवि।स्वपूर्णात्मशिवज्ञानीस्वछंदंवर्त्ततेयथा।इत्यादिवाक्यमखिळंश्रु
तिस्मृत्यादिमध्यगं।अलात्मज्ञस्तुतिद्वाराश्रवणादौप्रवर्त्तकं।अयमर्थोमहादेवप्रसादरहि
तैर्नृभिः।ज्ञातुंनशक्यतेशंभोःप्रसादोदुर्ळभोनृणां।अतःशिष्टजनाचारश्रुतिस्मृत्यादिसं
मतं।यद्यस्माकंप्रमाणंस्यादन्यथात्वन्यएवहि।मत्सर्वाचार्यपित्राद्यांश्चोतस्मात्तोदिवर्जिताः।
वर्णाश्रमाचारपराःसर्वज्ञावेदिकोत्तमाः।इत्यक्तिंचसदोमध्येभाषतेतुस्वदृष्टिणां।तस्मादिक
मनिष्टंयदस्मत्सिद्धोगुरोश्चतत्।कथमंगीकरिष्यामिनिर्वेदंश्रोतमप्यहं॥नतांभ्यामनुज्ञातो

धर्ममन्यंसमाचरेत्।वर्त्तयित्वामुक्तिफळंनित्यंनैमित्तिकंतथा।वाराणस्यांगतोतद्वत्सविद्या
प्रबोधने।गुरून्सर्वानतिक्रम्यगछेद्ब्रह्मबुद्धिमान्।गुरोरप्यवलिप्तस्यकार्याकार्यमजाना
तः।उत्पथंप्रतिपन्नस्यन्याय्यंभवतिशासनं।नियमातिक्रमंसर्वरहस्येवप्रबोधयेत्।अनि
वृत्तौस्वयंकर्मण्यारब्धेदनिवर्तयेत्।गुरुश्चगुणवान्प्राज्ञःपरमानंदभासकः।तत्वित्स
त्वसंपन्नोमुक्तितोनतुचापरः।यस्यानुभवपर्यंताबुद्धिस्तत्रप्रवर्त्तते।तस्यावलोकनाद्येस्तु
परानंदोभिजायते।तस्माद्यस्यैहसःपक्षात्प्रबोधानंदसंभवः।गुरुंतमेवदृणियान्नापरंमति
मान्नरः।यत्रानंदःप्रबोधोवानाल्पमप्यभिजायते।वत्सरादपिशिष्योवाकसोन्यंगुरुमुपाश्रये
त्।गुरुमन्यंप्रपन्नोपिनावमन्येतपौर्विकं।इत्यादिस्मृतिसज्ञावाद्गुरुंत्यक्त्वाजाड्यंपरित्यजन्।निःशं
कःश्रोतभस्मादनंगीकुरुदृढव्रतः।मातदेवोभवेत्यादिश्रुतिकोपस्तदेतिचेत्।अनवद्या
निकर्माणिसेव्यान्यन्यानिनोतथा।त्वयोपास्यानिसुचरितानिनोन्यानिनोतथा।इतिस्वयंबोध
यंत्याःश्रुतेःकोपःकथंभवेत्।श्रुत्यैवेतरशास्त्रेनविकर्माणिमहात्मनां।अवशानिसमाचरत

न्निषेधः कृतोयतः। विश्वस्यममवाक्यंत्वंत्यजन्नंधपरंपरां। निर्भयःश्रौतमस्मार्तनंगीकुरुविमुक्तये। यद्यपिस्यान्त्रिकाळज्ञःत्रैलोक्याकर्षणक्षमः। तथापित्रैलोकिकाचारंमनसापिनलंघयेत्। कर्मणामनसावाचायत्लाद्धर्मान्समाचरेत्। अस्वर्ग्यंलोकविद्विष्टंधर्म्यमप्याचरेन्नतु। देशाचारापरिग्राह्यातत्तद्देशीयउर्जितः। अन्यथापतितोज्ञेयःसर्वधर्मबहिःकृतः। युगधर्माःपरिग्राह्यावर्णैरेतैर्यथोचितं। ग्रामाचारःपरिग्राह्यःस्मृतिमात्राविरोधतः। तत्तत्तद्देशानेकस्मृतिवाक्यप्रमाणतः। लोकदेशायुगग्रामोक्ताचाराअविप्लवाअपि। ग्राह्याएवेतित्वेताज्ञैस्तेतथानेतिकोवदेत्। त्वयोदाहृतवाक्येष्वस्मृतिमात्राविरोधतः। कर्मणामनसावाचायत्लाद्धर्मान्समाचरेत्। अस्वर्ग्यमितिशब्दानामर्थकस्मान्नवेत्त्यहो। स्वयमेवविधायिन्याभस्मादेर्धारणस्यतु। स्मृतिमात्राविरोधंतद्धारणेकोवदेत्बुधः। भस्मादिधारणस्यानुष्ठातव्यस्यतुसर्वथा। धर्मत्वेयस्यसंदेहःसंदेहोस्यस्यजन्मनि। भस्मादिधारणंपुण्यंस्वर्गमोक्षैकसाधनं। अस्वर्ग्यत्वेनवदतस्तेविद्वत्ताविभात्यहो। भूयप्रधानगणकदृढवाळपुरोहितैः। दासवैद्यापरयशार्मासुहृन्मित्रसुबंधुभिः।

स्थ ४

७ श्लो ३

संबंधिज्ञामात्मुखैर्विवादोयोयमेवहि। सर्वथालौकिकाचारोवर्ज्यत्वेनविवक्षितः। नशिवार्चनतन्नामभस्मरुद्राक्षधारणं। श्रुतिस्मृतिपुराणेतिहासेषुविहितंयतः। स्त्रीणांस्तनावरणनासावरणधारणं। पुंशिरोवेष्टनंकेशश्मश्रुलोमादिधारणं। पथिमज्जांडवहनंमज्जांडस्थापनंबहिः। एतेहिवर्ज्यत्वेनैवदेशाचाराविवक्षिताः। नशिवार्चनतन्नामभस्मरुद्राक्षधारणं। सृष्टिपरिगृहीतत्वादेषुसकळेष्वपि। अस्वर्ग्याव्याद्येयात्राद्याःस्वर्ग्यःसन्यासएवकाः। धर्मःकळियुगेवश्यंवर्ज्यत्वेनविवक्षिताः। नशिवार्चनतन्नामभस्मरुद्राक्षधारणं। कळौवर्ज्येषुधर्मेषुनोक्त्वान्नारदीयके। समुद्रयात्राशिबिकाकमंडल्वादिधारणं। द्विजानांसर्ववर्णेषुकन्यास्वपनयंतथा। देवरेणसुतोत्पत्तिंमधुपर्कंपशोर्वधं। मांसादनंतथाश्राद्धेदानप्रस्थाश्रमंतथा। दत्ताक्षतायाःकन्यायाःपुनर्दानंपरस्यच। दीर्घकालब्रह्मचर्यंनरमेधाश्वमेधकौ। महाप्रस्थानगमनंगोमेधंचतथामखं। इमान्धर्मान्कळियुगेवर्ज्यानाकुर्मनीषिणः। शिवलिंगावनंचैवभस्मरुद्राक्षधारणं। कळौवर्ज्यतयानोक्तंकविन्नाप्यत्रसंशयः। दासीपरिग्रहश्चत्र

वस्त्राभरणमंडनौ। कूपसांडादिषुस्नानंसिन्नजातिषुभोजनं। एतेहिवर्ज्यंत्वेनवयामात्वाराविव
क्षिताः। नशिवस्यार्चनंवैवभस्मरुद्राक्षधारणौ। संध्यावंदनवद्ग्रामेग्रामेनित्यत्वशोभतः।
किंबहूक्त्याऽत्रवेदानामंगोपांगानिसर्वथा। देशजातिकुळाचारमपरंचसमासतः। विरोधेसति
वेदेनवेदमार्गेकसंस्थितः। ब्राह्मणःक्षत्रियोन्योवानिःशंकःपरिवर्जयेत्। शिवाराधनबुद्धै
वश्रुत्युक्तंनित्यमाचरेत्। वेदानुसारिशास्त्रोक्तंनिषिद्धंनकदाचन। दुर्वाससोमुनेःशापात्कु
पितस्यमहात्मनः। काण्वशापाद्भृगोःशापादुपमन्योश्चशापतः। दधीचस्यमुनेःशापाद्गौतमस्य
चशापतः। विप्राणांदक्षिणात्यानांपापोपहतचेतसां। शिवेभस्मनिरुद्राक्षेकेचिद्ब्रह्मन्विद्वे
षिणः। इत्यादिपुराणोक्तशापपापहरेपरे। ग्रंथेस्मिन्यस्यनप्रीतिःसतुसर्वशिरोमणिः। या
हकाबहवःसंतिवेण्याकस्यमहापणे। कश्चिद्वाक्तिकरुत्सर्याद्याहकस्तुमहामतिः। उन्मज्जंति
निमज्जंतिवारिधौवाऽन्यजंतवः। सर्वेमुक्ताफळंकर्णेबिभर्त्तिविरळोजनः। नात्यर्थंदुःसं
तःस्वयंप्रश्नान्वेत्तरेशक्याः। मत्सरग्रस्तनिबंधनमविकित्स्यमरोचकंयेषां। प्रकृतार्थंपरित्यज्य

वेतंडिकजनैःसहविवादेपिकृतेकंवशोषंमुक्ताफळंनहि। श्रुतिस्मृतिपुराणादितात्पर्यज्ञान
वर्जितः। यहिमुग्धःस्वमतेनप्रत्यहंप्रकृतंब्रुवेवेदनंत्रिविधंप्रोक्तंवेदांतार्थविचक्षणैः। प्रमाणा
न्यांतिसंदेहभेदैःकारणभेदतः। प्रमाणज्ञानसामग्र्योयुज्यंतेमहात्मभिः। तत्रैकाभावविज्ञा
नसामग्र्यीकथिताबुधैः। अन्यास्तुभावविज्ञानसामग्र्यःपंचधोदिताः। यद्योग्यानुपलब्ध्यैवज्ञा
विज्ञानमस्तितत्। अभावविज्ञानमितिकथ्यतेवेदवादिभिः। इंद्रियान्नविज्ञानंप्रत्यक्षंपरिभा
षितं। व्याप्याज्ञन्यंपरिज्ञानमनुमानमितीर्यते। सादृश्यहेतुर्ज्ञानमुपमानमुदाहृतं। अर्थाप
त्तिरितिप्रोक्तंज्ञानंत्वनुपपत्तिजं। तात्पर्योपेतशब्दार्थज्ञानंशाब्दमुदाहृतं। षट्सामग्रीषुशब्द
स्तुविशिष्टःकथ्यतेबुधैः। सर्वस्यव्यवहारस्यतन्मूळत्वेनसर्वदा। वेदोविशिष्टस्तत्रापिधर्मो
धर्मशबोधकः। अवक्तृकोन्यानपेक्षोनित्यःसर्वसमत्वतः। वेदस्यबोधकत्वंतुसर्वथानैवचि
द्यतासंरिप्सबोधकैर्वान्यथाबोधकतातथा। वेदानुक्तोतुतंज्ञेयोधर्मोवेदैकगोचरः। ग्राह्यो
ततोबोधकत्वंशंकावेदेनविद्यते। वेदोक्तार्थेनसंदेहोवैदिकानांशिवाज्ञया। आदिजायत

तेनैवावैदिकानाञ्चसंशयः।वेदार्थोयद्यसंदिग्धोमीमांसाहितयंतदा।किमर्थमितिवेलो
त्तबुद्धिदोषनिवृत्तये।सर्वज्ञज्ञानिवनिश्वासरूपयातत्सदृक्षया।श्रुत्यापिसंदिग्धमर्थंसवे
षविहीनया।धर्मशास्त्रेपुराणेतिहासशास्त्राभिधानितु।किंमूलान्यन्यमानानिनिश्चिन्वंति
द्दृष्टयशोगुणकर्मादिलिंगैश्चश्रुतिलिंगादिमानतः।अर्थनिर्णायकंशास्त्रमितिविद्वद्विनि
यः।उपक्रमादिश्रुत्यादिलिंगमानानिसर्वथा।वेदस्थानिहितंमूलंशास्त्रंवेदार्थबोधकं।इ
भाषाभिज्ञवच्छास्त्रंमंदबुद्धनुसारतः।वेदार्थस्मारकंचास्यप्रामाण्यंकेनवार्यते।एवंस्मृतिपु
राणेतिहासानांवप्रमाणतानस्वातंत्र्यान्नसर्वज्ञमुनिकर्तृकताबधात्।वेदानांतुप्रवृत्तेश्च
तुर्ह्यस्त्रैवर्णिकानृप्रति।तंत्रोक्तार्थान्यथाबोधकत्वंदूषणमेवहि।उक्तेनैवप्रकारेणसर्वदोष
विवर्जितं।ऋषयंत्यनुमानाभ्यांबौद्धावेदमपिस्फुटं।वेदप्रमाणंवाक्यत्वाद्याप्युरुषवाक्यव
त्तथानाप्तप्रणीतत्वाद्उन्मत्तानांयथावचः।तदयुक्तमितोहेत्वभावेतामप्रयोजको।वाक्य
त्वमात्रादेरस्यनभवत्यप्रमाणताअनाप्तपुरुषोक्तत्वंहिप्रमाणत्वसाधकंस्याद्नाप्तोक्त

तामीमांसादप्रामाण्यंनतुश्रुतेः।नित्यवेदस्यनाप्तप्रणीतत्वेनदुष्टता विप्रलंभादयोदो
षाविद्यंतेपुंगिरांसदा।वेदस्यापौरुषेयत्वाद्दोषशंकैवनास्तिनः।वेदस्यापौरुषेयत्वंकेचिन्ने
ष्यायकादयः।ईषयंतीश्वरोक्तंतुमन्यमानाःप्रमाणतां।पौरुषेयोभवेद्वेदोवाक्यत्वाद्भारता
दिवत्।सर्वेश्वरप्रणीतत्वेप्रामाण्यमपिसुस्थितं।प्रामाण्यमस्तिवानेतिपौरुषेयास्तिसंशा
यः।वेदेवकुरभाचाच्चतद्धांतेवदुसुदुर्लभा।वेदस्यनित्यताप्रोक्ताप्रामाण्येनोपयुज्यते।सर्वेश्व
रप्रणीतत्वंप्रामाण्यस्यैवकारणं।तदयुक्तंप्रमाणेनकेनाप्येश्वरकल्पना।सत्यद्यागमकल्प्यो
स्यान्नित्योनित्यःसआगमः।नित्यत्वेतंप्रतीशास्यकेयंकर्तृत्वकल्पना।अनित्यागमपक्षेस्याद्न्यो
न्याश्रयदूषणं।आगमस्यप्रमाणत्वमीश्वरोक्तेयेश्वरस्ततः।आगमात्सिद्धतीत्येवमन्योन्याश्रय
दूषणं।स्वतएवप्रमाणत्वमतोवेदस्यसुस्थितं।धर्माधर्मौश्वरावेदैकसिद्धाइत्यपिस्थितं।ननु
वेदं विनाधर्माधर्मशाकेरविल्ववत्।पश्यंतियोगिनःसिद्धाःकथंवेदैकमानता।तदयुक्तंनया
गम्यादस्मदादिदृश्यवत्।सोपिपर्वेदियैःपश्यन्विषयान्नातिरिच्यते।प्रत्यक्षमनुमानाख्य

मुपमानमनंतरं।अर्थापत्तिरभावश्चधर्मादीन्बोधयंतिनो।तत्रहींद्रियसंयोगेनवर्त्तमानार्थबो
धकं।प्रत्यक्षंनहिगृह्णातीनाप्यतीतमनागतं।धर्मादिनित्यसंबंधिरूपस्याभावतःक्वचित्।नानु
मानमपिव्यक्तंधर्मीधर्मंशबोधकं।धर्मादिसदृशाभावादुपमानंनबोधकं।सुखस्यकारणंधर्मो
दुःखस्याधर्मइत्यपिनिमित्तकारणंतद्धिगतःशिवइत्यपि।अर्थापत्यातुसामान्यमात्रेज्ञातेफ
लंनहि।सामान्यमनुष्येयंकिंवातीतंतदाप्तवेत्।यागादयोयेनुष्ठेयाविशेषाविधयोदिताःअ
त्रखेनहिवेदांतैर्विज्ञातोमोक्षदःशिवः।अभावाख्यप्रमाणंनपुण्यापुण्येशबोधकं।पुण्यापुण्ये
श्वरांशावरूपाइतियतस्ततः।वेदैकगोचरास्तस्माद्धर्माद्याइतिसुस्थितं।वेदस्यैवाधिकारित्वा
न्निर्मूलात्तथैवच।मोहनत्राच्चतंत्राणिनस्मरेछुद्धवैदिकः।वेदस्यैवाधिकारित्वंतंत्राणांनेष्यु १०
ज्यते।इतिचेन्नयतःकूर्मेपुराणेतत्पुटीकृतं।सतेषांमायया जातंगोवधंगौतमोमुनिः।केनापि
हेतुनाज्ञात्वाशापातीवकोपनः।सर्वेष्वथत्रयीबाह्यामहापातकिनःसमाः।चक्रुस्तुस्तथाशापा
ज्ञायमानाःपुनःपुनः।सर्वेसंप्राप्यदेवेशंशंकरंविष्णुमव्ययं।अस्तुवंस्तोकिकैस्तत्रुछिष्टैरिवस

धैर्गैः।देवदेवोमहादेवोभक्तानामर्त्तिनाशनः।कानोहत्तिर्महायोगोपापान्नःस्नातुमर्हथततः
पार्श्वस्थितंविष्णुंसंप्रेक्ष्यवृषभध्वजः।किमेतेषांभवेत्कार्यंप्राहपुण्येषिणामिति।ततःसभगवान्
विष्णुःशरण्योभक्तवत्सलः।गोपतिंप्राहविप्रेंद्रानालोक्यप्रणतान्हरिः।नवेदबाह्येपुरुषेपु
ण्यलेशोपिशंकर।संगच्छतेमहादेवधर्मोविद्राद्धिनिर्वभौ।तथापिभक्तवात्सल्यादुक्तव्यामह
श्वरास्माभिःसर्वथैवेमेगंतव्योनरकानपि।तस्माद्वेदबाह्यानांरक्षणार्थंत्वयापिनां।विमो
हनायशास्त्राणिकरिष्यावोवृषध्वजाएवंसंबोधितोरुद्रोमाधवेनमुरारिणा।चकारमोहशास्त्रा
णिकेशवोपिशिवेरितः।कपालंत्वाकुलंवामंभैरवंरुरवंपश्चिमं।पंचरात्रंपाशुपतंतथान्यानि
सहस्रशः।सृष्ट्वाह्यान्वतुर्देवौकुर्वाणाःशास्त्रबोधितं।पतध्वंनिरयेघोरेचक्रुःकल्पान्पुनःपु
नः।ज्ञायध्वंमानुषेलोकेक्षीणपुण्यैचयास्ततः।ईश्वराराधनबलात्गछध्वंसुकृतांगतिं।वर्त्तध्वं
मदादेशमादेननान्यथास्तिगतिर्हिवः।एवमीश्वरविष्णुभ्यांबोधितास्तेमहर्षयः।आदेशंप्रत्यपद्यंत
शिरसासुरविद्विषोः।चक्रुस्तेन्यानिशास्त्राणितत्रतत्ररताःपुनः।शिष्यानध्यापयामासुर्ऋ

यलाफलानितु। क्वचित्क्वचित्पुराणादौवेदमूलेपिसर्वथा।संतिनिर्मूलतंत्रांशास्तेतुग्राह्यानवैदिकैः।पुराणादौतुतंत्रांशास्तंत्राणिचशिवाज्ञया।वेदाश्चोपायबुद्ध्यैवग्रहीयात्तांत्रिकोमुदा।वेदनिष्ठापितंत्राणितांत्रिकांश्चनदूषयेत्।तंत्रनिष्ठस्तथावेदांश्चैदिकांश्चनदूषयेत्।ऋग्यजुःसामाथर्वाश्चभारतंयांवरात्रिकं।मूलरामायणंचैवशास्त्रमित्यभिधीयते।यज्ञानुकूलमेतस्यतच्छास्त्रंप्रकीर्त्तितं।अतोन्योयंथविस्तारोनैवशास्त्रंकुवर्त्मतत्।सांख्ययोगांवरात्रंवेदाःयाश्चपतंतथा।एतान्यपिप्रमाणानिनहंतव्यानिहेतुभिः।एवमादिस्कांदभारतस्थानिवचनानितु।वेदतंत्रादिसंप्राप्यवस्तैकत्वपराणिहि।एकवस्तुपरत्वंवेदतंत्रादेःसमीरितं।ज्ञानानूद्बोधयितुंतानि प्रवृत्तानिनचान्यथा।एकवस्तुपरत्वेपिसमेतत्तत्त्वबोधने।वेदएवसमर्थोतोवेदोमार्गोत्तरात्परः। प्रवृत्तान्यथवेतानिवचनानिशिवाज्ञया।तांत्रिकान्प्रतिनोश्रुत्वैदिकानमूलान्प्रतिवै दमाहात्म्यलेशांशोमयाभक्त्याप्रदर्शितः।वेदस्याशेषमाहात्म्यंमयावक्तुंनशक्यते।अमरानंदयोगीशः स्वात्मयोगप्रदीपकृत्।शास्त्राधिक्यंततोवेदाधिक्यंचप्रोक्तवान्मुदाचिन्मयस्य

१९

महसोमहाप्रभःशाक्तराज्ञिरखिलार्थभासकः।वस्तुनिष्ठवृत्तिर्नतंविनालौकिकेयिनितरामतोद्विये।सर्वमेववदतस्वगोचरज्ञानमूलमिवलौकिकंवचः।वक्तृदोषविगमात्प्रमाणतानित्यमेवनिगमेलवक्तृके।सूत्रभारतपुराणसंहिताधर्मशास्त्रमुरवार्षभाषितं।मानतांस्मृतितयाप्रयातियन्मूलकंसनिगमस्तकेंपुनः।शास्त्रदोषाइवस्तावदस्तुक्रमीनइतिस्थितिः। तद्भावःकवित्तावद्गुणवद्वक्तृकत्वतः।तद्गुणैरपकृष्टानांशास्त्रेसैक्यात्संभवात्।यद्वावक्तृभावेनवक्तृदोषानिराश्रयाः।एवंतुभद्रबाह्यैश्चागमदोषानिराकृताः।वासिष्ठलिंगेकपया दक्षिणामूर्त्तिरीश्वरः।शांडिल्यस्यप्रसंगेनवेदमाहात्म्यमुक्तवान्।पुराशांडिल्यसंज्ञस्तब्राह्मणःकश्चिदल्पविद्।वेदवादंपरित्यज्यसाहसीबुद्धिपूर्वकं।परदारंसमागम्यरुद्रलोपानिसंत पा.८ तं।वासुदेवंकुमार्गेणपूजयामाससुव्रतः।ततोविश्वाधिकोविष्णुःप्रादुरासीत्समायया।तस्याग्रेसोपितंदृष्ट्वापूजांचक्रेपुनःपुनः।ततोमायीहरिर्ब्रह्मन्शांडिल्यंप्रत्यभाषत।धिक्कुधिक्कुशांडिल्यदुर्बुद्धेसाधुनीचमतोभवान्।कोवावर्णाश्रमाचारंश्रौतंस्मार्तंकुलंत्वया।विनाशक्तःपापबलाच्च

क्तोनास्तितेनिष्कृतिःश्रुतौ।कुमार्गेणापिशांडिल्यकृतापज्ञाममत्वया।ततःकाष्ठेनमहता वेद
मार्गेगमिष्यसितस्मात्त्वंपंचराजोक्तवर्त्मनाश्रद्दयासह।मामाराधयशांडिल्यब्राह्मणांश्चापिज
क्तितः।इत्युक्त्वाभगवान्विष्णुःतत्रैवांतरधीयत।शांडिल्योपिपुनर्ब्रह्मन्नृपंवराजंतुवैष्णवं।परि
गृह्यपुनर्विष्णुंपूजयामासभक्तितः।पुनर्विष्णोःप्रसादेनवेदमार्गोतिवर्त्तिनी।शांडिल्यसंहितां
चक्रेवैष्णवंमहतीमुने।तस्यांचकुर्मुनेर्दीक्षांपाखंडाःपापयोनयः।स्थापितायांतुशांडिल्यस्संहि
तायांममारचवज्रदंष्ट्राःकराळास्याःकुहाःपाराधरामुने।श्लक्ष्णहस्ताःकराळास्याःकुटिळाःकृष्ण
वियहाः।निर्घृणाःसततंब्रह्मन्नयमहताभयंकराः।बधापाशानशांडिल्यमार्गेदुष्टकेमुने।अ
धोमुखोर्ध्वपादंतंसर्वदाकृष्यमुग्ररैः।पीड्यांधकूपेनिक्षिप्ययमराजस्यसंनिधौनिधायपीड्य १२
पादेस्तंपस्पैस्यवुर्यमंप्रति।सोपितंप्रेक्ष्यडुंढिंयमराजोभयंकरः।प्राहतीक्ष्णतयावाचापीड्य
तांममसंनिधौ।इत्युक्तायमराजेनशांडिल्ययमकिंकराः।मुग्ररैःखड्गशूलाद्यैःपीडांचक्रुर्महा
मुने।पुनश्चायमतिक्रुद्धोरक्तघूर्णितलोचनः।इष्टानामप्यनिष्टानांसाधनंमातवत्सदा।प्राप्तये

परिहारायबोधयंतीश्रुतिर्बलात्।बुद्धिपूर्वंपरित्यक्तानेनसाक्षादुरात्मना।तस्मादेनंतुपाखंड
त्यापविनिहत्यय।रौरवादिषुसर्वेषुनरकेषुक्रमेणतु।भोजयित्वामहाघोरान्यप्रसह्यान्यने
कशः।आगच्छध्वंसहानेनशांडिल्येनदुरात्मना।इतिसंबोधिताब्रह्मन्यमहताययमंनतु।न
थेवचक्रुःपापिष्ठमहानामयुतंसदा।पुनश्चेमंसमादायययमहताययुः।तंदृष्ट्वायमराजो
पिप्राहगंभीरयागिरा।भद्रंभद्रंत्वयासुक्तंकल्याणात्तीवदुःसहं।पापानांफळमाश्चर्यंगछ
विष्णोःपरंपदं।इत्युक्तोयमराजेनशांडिल्योविष्णुमासदा।दृष्ट्वाशांडिल्यमनघंविष्णुर्मुक्त
हृतेरतः।प्रसादमकरोत्तस्यपुनरेनमभाषत।वेदमार्गपरित्यागफळंभुक्तंत्वयानघ।मत्तं ६४
त्राश्रयणेनैवमस्यज्ञाचक्तात्वया।तयानेप्रीत्तवानस्मितवशांडिल्यमेप्रिय।स्त्रियोपिमत्प्रसा
दनकर्मभ्रमोद्विजोत्तमः।स्त्रीवर्णाश्रमाचारंश्रोतंकृत्वायथाबळं।मज्जयातीवसंयुक्तोमम
राधनतत्परः।साक्षात्ब्रह्मैकविषयंज्ञानंलब्ध्वामतोभव।इत्युक्तोविष्णुनाब्रह्मन्नज्ञातवान्न
सद्विजोत्तमः।ब्राह्मणानांकुळेशुद्रेसाक्षादग्निसमोमुने।सपुनर्वासुदेवस्यप्रसादेनमहामु

ने।ब्रह्मचर्याश्रमे...ल्लाये दंसर्वमधीतवान्।पुनःस्नात्वासुरवीरस्त्वाशांतःसत्यपरायणः।अग्नी
नाधायविधिवत्कृत्वायागमनंतरं।प्रक्षीणष्टपापःशुद्धात्माब्रह्मज्ञानेसदारतः।अनित्यमीश्वरा
दन्यदितिज्ञात्वाप्रसादतः।विरक्तःसर्वलोकेभ्यस्त्यक्त्वाकर्माणिसुव्रत।आचार्यात्श्रुतवेदांतो म
त्प्रसादान्महामुने।सर्वलोकविधातारंसर्वज्ञंसर्वकारणं।सत्यबोधसुखानंदमादिमध्यांतव
र्जितं।अप्रमेयमनुपम्यमनिर्देश्यंशिवाभिधं।मामपश्यतयत्नेनमुनेस्वात्मतयासदा।प्रारब्ध
कर्मप्राबल्यात्प्रपंचप्रतिभासतः।मुक्तोपिमुक्तवान्भोगान्कंचित्काळमनादृतः।सपुनःकर्म ५८
णामंतेनिहतोविश्वमायया।एवंवर्णाश्रमाचारान्हृदासिह्यदयेन्नतः।शांडिल्यापिविमुक्तोथत
ल्लिष्याश्चैवमेवहि।बहवोनेनमार्गेणयतामरूपमागताः।वेदमार्गंविनाब्रह्मन्नास्त्युपायोवि १३
मुक्तये।धर्मशास्त्राणिवेदांगान्युपवेदास्तथैवच।पुराणानितथासांख्ययोगंपाशुपतंतथा।देश
जातिकुलानांचधर्माश्चान्यमहामते।सर्ववेदाविरोधेनप्रमाणंनान्यथाभवेत्।याचेदबाह्याःस्म
तयोयाश्चकाश्चकुदृष्टयः।सर्वास्तानिष्फलाःकिंचप्रत्यवायस्यहेतवः।तस्मात्सर्वप्रयत्नेनब्रह्म

ब्रह्मावेदांवर।त्यक्त्वावेदविरुद्धानिवेदमेकंसमाश्रयेत्।इतियरमेश्वरवाक्यमसीदंश्रुतिव
चनेनसमंहृदिधत्तौधतहृदयःप्रणिपत्यमहेशंश्रुतिमौलिमानमवेतिवसिष्ठः।तंत्रसंबंधगंधा
त्तारहितेभ्योपरात्परे।प्रोक्तवान्वेदमाहात्म्यंतत्रतत्रपरात्परः।अथातःसंप्रवक्ष्यामिशुकतेषु
घमुत्तमं।ब्राह्मणानांविशेषेणज्ञातव्यमिदमुत्तमं।प्रत्यक्षवेदसिद्धोर्थःसंग्राह्यःसर्वचेतनैः।
अप्रत्यक्षश्रुतेरर्थस्मरंतिमुनिसत्तमाः।क्वचित्कदाचित्तंत्रार्थकदाहेणमुनीश्वराः।अधिकारि
विशेषाणांप्रवदंत्यर्थमास्तिक।शिवागमानुसारेणप्रवदंतिक्वचित्क्वचित्।विष्ण्वागमानुसा
रेणब्रह्मतंत्रानुसारतः।जन्मनाब्रह्मजातीनांसर्वेषामास्तिकोत्तमा।अश्रमाणांतुसर्वेषांधर्मं
माहपराश्रुतिः।स्मृतयश्चपुराणानिभारतप्रमुखान्यपि।क्वचित्कदाचिद्वृद्धानांवेदाहुर्मान्नुवं
तित्वा।वर्णाश्रमपरिभ्रष्टःप्रायश्चित्तेघनुन्मुखः।वेदेतरागमंगत्वातुक्षंधर्मंमाचरेत्।वेदवेदां
तविज्ञानेवेदोक्तेचैवकर्मणि।वेदानुसारिशास्त्रोक्तेब्रह्मन्पुण्येनजायते।वेदमार्गात्तरेमार्गेस्व
तंत्रेपापकर्मिणां।नराणांजायतेवांछास्वभावेनैवसत्तम।वेदवादेतरासक्ताबहवोमुनिसत्तमाः।

आज्ञयादेवदेवस्यशिवस्यनरकंगताः।वेदोदितसमाचारनिरताब्रह्मयोजनाः।प्रसादादेव
रुद्रस्यविमुक्ताभवबंधनात्।यथामात्तास्वपुत्राणांकेवलंकृपयैवतु।रक्षिकातद्वदेवेयंश्रु
तिःसर्वजनस्यतु।यथाशत्रुजनःसाक्षाद्बाधकःसर्वदेहिनां।तथावेदेतरोमार्गोवैदिकस्यतु
बाधकः।तंत्राणितंत्रनिष्ठानांरुद्रकाण्यपिचक्रमात्।बाधकानिविशेषेणवेदमार्गिकवर्त्मि
नां।अतःश्रुत्यादितंधर्मंग्रहीयादेववैदिकः।तंत्रसिद्धंनगृह्णीयान्मोहादपिकदाचन।यतु
तंत्रानुरोधेनकथितंतत्परित्यजेत्।धर्मशास्त्रेपुराणेचयत्नतोवैदिकोजनः।वेदादन्यत्रवि
ज्ञानंनास्तिनास्तिक्रियाशुभा।अतःपरमकल्याणंहिजोवेदंसमाश्रयेत्।वेदमूलानिशास्त्रा
णिस्मृत्यादीनिमहांतिच।पुराणादीनिसर्वाणितस्माद्वेदंसमाश्रयेत्।वेदमूलतयातानिप्र
वृत्तान्यपिसत्तम।ब्रुवंतिवेदबाह्यार्थंकदाचित्कचित्कचित्।भ्रांतिप्रत्यूहदोषेणयद्दृष्ट
तयाशुक।वैदिकैस्तत्परित्याज्यंनवैग्राह्यंकदाचन।अज्ञपादप्रणीतेचकाणादेसांख्ययोग
याः।त्याज्याःश्रुतिविरुद्धांशाःश्रुत्यैकशरणैर्नरैः।पाणिनीयंमहाशास्त्रंपदसाधुत्वलक्षणं।



दृष्ट्वेच्छेत्स्नानमाचरेत्।वेदबाह्यागमाचारंसमस्तंमोहतोपिवानकुर्याद्वैदिकोम
र्त्यःक्रियाश्चेत्यतितोन्नवेत्।धर्मशास्त्रेश्वेदस्यप्रतिषिद्धंसमाचरेत्।कदाचिद
पिमोहाद्वावैदिकोनसमाचरेत्॥६

सर्वोपकारकंग्राह्यंकृत्स्नंत्याज्यंनकिंचन।जैमिनीयेचवैयासेविरुद्धांशानकश्चन॥श्रु
त्यावेदार्थविज्ञानेशुकपारंगतोहितो।बौद्धमार्हादितंशास्त्रंलोकायतिकसंज्ञितंपाषंडम
यंशास्त्रंवैदिकस्तत्परित्यजेत्।वेदवादपरित्यागंनकुर्यान्मोहतोपिवा।यदिकुर्यात्प्रमाद
नयतत्येवनसंशयः।वेदबाह्यागमान्सर्वान्वेदबाह्यांश्चवैद्यवान्नवेदबाह्यास्तथान्या
न्गृह्णीयान्नेववैदिकः।वेदबाह्यागमस्थांश्चमनुष्यानखिलानपि।श्रौतस्मार्तपरोमर्त्यो मोहना
पिनसंस्पृशेत्।वेदबाह्यागमस्थांश्चमोहनापिस्पृशेद्यदि।श्रौतस्मार्तपरोमर्त्यःकुर्यात्तस्तत्
तोषवेत्तीमध्यदेशादिसंसिद्धंसदाचारंसमाचरेत्।श्रुतिस्मृतिविरुद्धंतुतत्रापिनसमाच
रेत्।सर्वदेशेषुयश्रुत्यास्मृत्योर्विहितस्तथा।आचारोप्रतिषिद्धश्चसप्रमाणंनसंशयः।
ब्रह्मलोकेतथावैद्येप्राजापत्येचमानुषे।श्रुतिस्मृतिविरुद्धश्चसमाचारःप्रवर्त्तते।देवानांच
मुनीनांचमनुष्याणांसतामपि।प्रवर्त्ततेतुराचारःकश्चिद्दुर्निवारकः।महत्तरोपिभगवान्म
हादेवःप्रजापतिः।अभ्यध्यायत्पुरापुत्रीमवशःकामपीडितः।अहिल्यामपिकल्याणीमादायं

इ सुरोत्तमः। शातंत्र्यं गौतमेनैव सर्वेषामपि संनिधौ। वसिष्ठस्तूर्वशीं दृष्ट्वा प्रस्खलत्यतिमोहितः। मत्स्यगंधामहं दृष्ट्वा मुनींद्राअपरास्तथा। किंपुनर्मनुजाः क्षुद्राअधर्मबहुलामुने। अतः सर्वत्र सर्वेषां संभवंत्येव दुष्कृतं। श्रौतस्मार्त्तसमाचारश्च हापुण्येनजायते। अश्रौतेजायते वांछादेहिनांपापकर्म्मिणां। वेदांगधर्मशास्त्रंच पुराणंभारतंतथा। देशजातिकुलाचारमपरं वसमासतः। विरोधेसतिवेदेनवेदमार्गैकसंस्थितः। ब्राह्मणःक्षत्रियोन्योवानिःशंकंपरिवर्जयेत्। अतः सर्वंपरित्यज्यश्रुतंनित्यमाचरेत्। वेदानुसारिशास्त्रोक्तं निषिद्धं नकदाचन। अतींद्रियार्थविज्ञाने प्रमाणंवेद एवहि। स्मृतयश्चैतन्मूलानेवान्यत्सत्यमीरितं। धर्माधर्मौ तुकेसाद्दागमाः पुरुषोदिताः। पंचरात्रादयः सर्वेनप्रमाणमितिस्थितेः। वेदोदितसमाचार- २५
विपरीताश्चयेतिये। आचारास्तेषुतेसर्वेतेषुश्रुत्यकीर्त्तिताः। वेदाविरुद्धाआचारास्तेषुतेषु वसन्नमाः। तिपतेषुचसर्वेषुविष्णुर्हृत्यवकीर्त्तिताः। अनुकूलस्तुवेदानामाचारस्तेषुयः स्थितः। सायंवेदैकनिष्ठानामितिवांछंतिकेचन। वेदमूलतयानित्यं प्रवृत्ताअपिसन्नमाः क्वचित्क

दाचित्स्मर्त्तारस्तंत्रार्थंचब्रुवंतिवै। क्वचित्तंत्रानुरोधेनधर्मपौराणिकाअपि। वदंतितादृशांशास्त्रंत्रावल्लंबिना। पुराणेधर्मशास्त्रेवायोराश्रुत्याविरुध्यते। सतंत्रार्थस्तुविज्ञेयः समासेनमनीषिभिः। अतः सर्वंपरित्यज्यविरुद्धंवेदमानतः। वेदाविरुद्धंवेदोक्तंयद्यदपिसन्नमः। वेदमार्गसमंमार्गमितरंमनुतेतुयः। अधिकंवास्यसांकर्यंमनुमेयंविपश्चिता। सर्वमुक्तंसमासेनविज्ञेयंवेदवित्तमैः। इतःपरंनविज्ञेयंकिंचिदस्त्यास्तिकस्यतु। द्वितीयसंहितायांश्रीस्कांदेत्यंतकृपालुना। स्वतंत्रेवेदमाहात्म्यंतत्रतत्रप्रदर्शितं। श्रुतिर्बलीयसीप्रोक्ताप्रमाणानांसुलोचने। स्वतश्चपरतोदोषोनहितस्याःकदाचन। अन्येषामस्मृतीनांप्रमाणानामविद्यया। दोषसंभावनास्त्येवततस्तेषांसुलोचने। विरोधेवेदवाक्येनप्रामाण्यंनैवसिध्यति। स्मृतयश्चपुराणानिभारतादीनिसुंदरि। वेदमूलान्यतस्तेनविरोधेमूलिनामपि। नसिध्यंत्येवसुश्रोणिप्रामाण्यंस्वल्पदर्शने। पंचरात्रादिमार्गाणांवेदमूलत्वमास्तिके। नहिस्वतंत्रास्तेनध्वांतिमूलानिरूपणे। तथाचैवशैवमार्गाणांवेदेननविरुध्यते।

सांशःप्रमाणमित्युक्तंकेषांचिदधिकारिणां।अत्यंतमोक्षिणानांतुप्राणिनांवेदमार्गतः।पंच
रात्रादयोमार्गाःकाळेनैवोपकारकाः।तांत्रिकाणामहंदेविनळभ्योव्यवधानतः।काळेनदेव
ताप्राप्तिद्वारयोवाहमास्तिकेळभ्योवेदैकनिष्ठानामहमव्यवधानतः।तत्रापिकर्मनिष्ठेभ्यो
ज्ञाननिष्ठस्यसुंदरि।ळभ्योनज्ञानिनांळभ्यस्तेषामात्मैवकेवळंदृष्टसाम्येनवेदज्ञाःखलु
तर्कार्थसाधकः।श्रुतिरन्यानपेक्ष्याहिऽद्वैतेंद्राअर्थसाधिकाप्रत्यक्षादिप्रमाणानांषंचानां
पंडितोत्तमाः।अगम्यंब्रह्मधर्मश्चाधर्मःश्रुत्यैवगम्यते।अंतरेणश्रुतिंबोधुंयतंतेऽतींद्रियंय
दं।येतेकरेणमाधुर्यंज्ञानंत्येवसुनिश्चितं।पुराकश्चिन्महामद्रःसंगिरोनामवैद्विजः।एर्वज
न्मकृतात्पापाद्दरश्रद्धाविवर्जितः।तर्कशास्त्ररतःसाक्षाद्ब्रह्मातींद्रियमव्ययं।धर्माधर्मौचत। १६
र्कणकेवळेनमुनीश्वराः।अलक्ष्येनपरिज्ञातुमकरोद्यत्नमुत्तमं।तर्कोनानाविधस्तस्यप्रति
भातोमुनीश्वराः।अलक्ष्येनपरिज्ञातुमकरोद्यत्नमुत्तमं।तर्कोनानाविधस्तस्यप्रतिभातोमुनी
श्वरोतेनमोहाहृतःसद्यःसंगिरोमुनिसत्तमाः।चकारदीक्षांपाषंडमार्गेश्रद्धापुरःसरं।पुन।

पुनस्तर्कोप्रतिष्ठानात्मायायापरिमोहितः।त्यक्त्वापाषंडमार्गंचविस्मा
रयणरुचि।२

स्तर्कोप्रतिष्ठानात्संगिरोतीवमोहितः।चकारदीक्षांपाषंडविशेषेषुयथारुचिं।पुनर्मोहाद्ध
तःसाक्षात्स्वसारंमातरंतथा।गत्वामारकाळेनसंगिरःसाहसीद्विजः।अलक्ष्याअतिसंरक्ष्या
यमदूताभयंकराः।संगिरंतुसमादायशीघ्रंविप्रायमंययुः।यमस्तंसंगिरंकुद्धोविलोक्या
तिभयंकरः।यथाशक्तिभटाएषःपीड्यतांममसंनिधौ।इतिप्राहयमःसोपिसंगिरोयमकिंक
रैः।अतीवपीडितोविप्राअभवच्चविवेष्टितः।पुनश्चतीक्ष्णयावाचायमःप्राहसुदारुणं।भि
द्यतांसंगिरोदुष्टश्छिद्यतांदह्यतामयं।इत्युक्त्वादिपुत्रेषःपीड्यतामतिरांभटाः।अन्येनाना
विधैःक्रूरैरुपायैःपीड्यतामिति।संगिरोयमदूतैश्चक्रमेणनरकार्णवे।यंत्रैर्नानाविधैरन्यैरु
पायैरतिदारुणैः।अतीवपीडितोविप्राअभवत्कोटिवत्सरं।पुराकृतमहापुण्यपरिपाकबळेन वा ५
प्रसादादेवरुद्रस्यशिवस्यपरमात्मनः।अकस्मादागतस्तत्रमहातेजामहामतिः।
शांभुभक्तःशातानंदोनाम्नाशांभुरिवापरः।सपुनःपीड्यमानंतंविलोक्यकरुणाबळात्प्राहोन्म
मःशिवायेतिमंत्रराजंषडक्षरं।तदैवनरकःसाक्षात्स्वर्गलोकोभवद्द्विजाः।पुनःशातानंदसमा

कयोमुनिर्यमंसमाकूयसमस्तसंनिधौ।इमंबभाषेवचनंसुरवादंसमस्तलोकस्यमु
नीश्वरेश्वराः।अश्रौतावारसंपन्नःश्रौतावारपराङ्मुखः।गुरुद्रोहीचयोमर्त्यस्तंत्वंघातय
ऽऽशनं।उत्कर्षेवेदमार्गस्ययोनजानातिमानवः।वेदान्यस्यैवचोत्कर्षंतंत्वंघातयऽऽशनं।एव
मुक्तामुनिःश्रीमांल्लतानंदसमाह्वयः।कैलासमगमद्रुद्रंतत्रस्तोतुंकुतूहलात्।यमापिसंगि
रोवप्राःसमाकूयादरेणच।विनैववेदंतर्कस्यकेवलस्यपरिग्रहात्।त्वयासुकंमहद्दुःखंअ
प्रसद्यमनेकशः।पुराकृतेनपुण्येनमहादेवप्रसादतः।षडक्षरमहामंत्रश्रवणाच्चतथैव
चदुःखादपिविनिर्मुक्तस्त्वंमहात्मासुखप्रदं।आत्मण्यंप्राप्यवेदस्यविदित्वावैभवंपुनः।त
दुक्तंधर्ममास्थायपुनर्वेदांतवाक्यऽऽं।शिवज्ञानमवाप्याशुविमुक्तोभवबंधनात्।इत्युक्त्वा
दुयमःश्रीमानगमत्स्वपुरंप्रति।अतोवेदोदितोह्यर्थःसम्यगर्थःसुनिश्चितः।तर्कोसिद्धोतिदुः
स्वार्थःप्रत्यवायस्यकारणं।बहवःकेवलंतर्कमाश्रित्यविनावैश्रुतिंशैवादिषुसंतप्तश्र
भवंवेदविन्मताः।हेतुकैःसहवासश्चसहपंक्तौचभोजनं।स्यष्टिस्तेषांनराणांतुनरकायन

संशयः।हेतुकस्यमहापापीमहापातकिनासमः।नास्यनिष्कृतिस्तस्माद्धेतुकंपरिवर्जये
त्।वेदवादमिमंमुक्तामार्गमन्यमुपाश्रितः।हस्तस्थंपायसंत्यक्त्वालिहेत्कूपरमात्मनः।वि
नावेदनऽंतर्नांमुक्तिर्मार्गांतरेणचेत्।तमसापिविनालोकंनेपश्यंतिघटादिकं।तस्माद्वेदो
दितोह्यर्थःसत्यःसत्यंचसम्मतं।मयादितेअन्येनवोदितोह्यर्थोनसत्यःपरमार्थतः।यावद्धा
रिकसत्यार्थंसाक्षात्सत्यार्थचिद्घनं।उभयंवक्तिवेदस्यमार्गोनैवंवदंतिहि।स्वभावस्थासुसं
स्कृतसत्यार्थनसमानिमाः।अर्थानैवामनंत्यन्यमार्गाहस्वर्गवासिनः।जाग्रत्कालेतुसंस्कृत
सत्यार्थनसमानिमाः।मार्गानैवामनंत्यर्थान्नाकाकथासत्यचिद्घनेऽऽद्यादिस्फुरितावस्थाम
चिद्रूपस्वयनाम्निधा।अवस्थासत्यरूपाहिनसत्याहृदिलोकसः।तथापिस्वप्नदृष्टंतुवस्तुवस्त्व
नीनिवासिनः।सत्यकल्पंहिसत्यंवज्जाग्रत्सत्यार्थसिद्धयेतथैवमार्गास्तुक्षत्रांताअपिवेदोदि
तस्यतु।अर्थस्यप्राप्तिसिद्ध्यर्थाभवंत्येवनसंशयः।तस्माद्वेदोदितोमार्गोनैवत्याज्योनिरूपा
णांवेदनिष्ठस्तुतोमार्गोवक्तादिदोषनस्पृशेत्।वेदनिष्ठस्तुमार्गस्थान्मोहनापिस्पृशेद्ध

हि। प्रायश्चित्तीभवत्येवनात्रकार्यो विचारणा। एकस्यामपितेःसार्द्धंकौवेदैकसंस्थितः। मो
हनापिनसुंडोयाद्गुल्कावांडायणंचरेत्। इष्टंदानविवाहादिकार्यमध्ययनंश्रुतेः। यदितै
र्मोहतःकुर्यात्कुर्याच्चांडायणत्रयं। धर्मोधर्मोतुविज्ञानंनादृतश्रुतौस्थितः। तस्मोमोहा
दपिप्राज्ञःश्रेयस्कामःकदाचन। वेदबाह्येषुमार्गेषुसंस्थितायेनराःसुराः। तेहिपापंहिनस्सा
हात्तथातैःसहचासिनः। अतींद्रियार्थविज्ञानेमानंनःश्रुतिरेवहि। श्रुत्येकगम्येसूक्ष्मार्थे
सतर्कःकिंकरिष्यतिमानानुग्राहकस्तर्कोनस्वतंत्रःकदाचन। श्रुतिःसनातनीशंभोरज्ञि
व्यक्तानसंशयः। शंकरेणप्रणीतेतिप्रवदंत्यपरेजनाः। यदासानादिभूतैवतदामानमतीं
वसा। स्वतश्चपरतोदोषानास्तितस्याद्विजर्षभाः। स्वतोदोषानशंकास्यविद्यतेसूक्ष्मदर्शो
नः। अस्तिचेद्व्यवहारस्यलोपएवप्रसज्यते। परतश्चनदोषास्तिपरस्याप्राप्ततोद्विजाः। स्वतो
ऽष्टापिशंकरमानमेवाप्तसंगमात्। इतिवार्त्तापिवार्त्तैवमुनींद्राःसूक्ष्मदर्शने। स्वतोऽष्टःक
थंमानंभवत्यन्यस्यसंगमात्। यस्मेबंधेनयोभावोयस्यप्राज्ञःप्रसिद्ध्यति। सतस्यशांतिरेव

स्यान्नस्वभावःकथंचन। जपाकुसुमलोहित्यंविभातिस्फटिकेभृशं। तथापितस्यलोहित्य
शांतिरेवनवास्तवं। वह्निपाकजलोहित्यमिष्टिकायांनवास्तवं। लोहित्यंतेजसोंशस्तुनेष्टको
यांनिरूपणे। अन्योन्यस्यधर्मस्तुप्रतीतोविघ्नमोमतः। आप्तापेक्षातुशास्त्रस्यप्रामाण्या
यनसंशयः। अनाप्तयोगाच्छास्त्रस्यप्रामाण्यंमुनिपुंगवाः। स्वतःसिद्धंतिरोस्तंतन्नाशाय
हिकेवलं। यदासाशंकरेणोक्तातदापिश्रुतिरास्तिकाःप्रमाणंसुतरामास्तएवमहेश्व
रः। सर्वदोषविहीनस्यमहाकारुणिकस्यच। सर्वज्ञस्यैवशास्त्रस्यकथंदोषःप्रकल्प्यते। स
र्वदोषविशिष्टस्यनिर्घृणस्यदुरात्मनः। अन्यज्ञस्यैवमर्त्यस्यदृष्टानास्तिहिसत्तमाः। यस्य
स्मरणमात्रेणसमग्रोनिर्मलोभवेत्। अतस्तत्तपोनिष्ठःकथंसमग्रिनोभवेत्। अतःयद्य
द्यपिवेदोमानंनसंशयः। वेदोनादिःशिवस्तस्यव्यंजकःपरमार्थतः। अभिव्यक्तिमये
श्वरप्रणेतेत्युच्यतेशिवः। तस्माद्वेदोपदिष्टार्थोयथार्थोनास्तिसंशयः। ईश्वरस्यस्वरूपेच
जगत्सर्गादिकृद्विजाः। अतींद्रियार्थधन्येषुमानंनःश्रुतिरेवहि। वेदमानेनसंसिद्धंसर्वसंग

DEENAU

ष्मेवहि।वेदानर्हत्ववेदार्थंचोद्यंकुर्वन्नपत्यघः।अतःसर्वंयथोक्तंज्ञेयंवेदमेकंसमाश्रये
त्।रूपावलोकनेचक्षुःयथासाधारणंभवेत्।तथाधर्मादिविज्ञानेवेदोसाधारणःपरः।
रूपावलोकनस्येदंयथाघ्राणंनकारणं।तथाधर्मादिबुद्धेरुक्तादृष्टार्थस्तर्कोनकारणं।तस्मा
दुक्तंनवप्रकारेणमहेश्वरः।अद्वितीयःस्वयंभुश्चतथापीदंजगत्ततः।आविर्भूतंतिरो
भूतंसएवसकलंजगत्।यथायःपावकेनेद्धेभातीवदहतीवच।तथावेदश्चतेमूर्तेः
सर्ववक्तीवभासते।अयोघनेवसंक्रांतोयथादहतिपावकः।तथावेदश्चसंक्रांतःशिव
एवार्थसाधकः।तथापिवेदरहितःस्वयंधर्मादिवक्तृनिनप्रमाणंविनातेनवेदार्थंवदेत्पुं
गवः।तस्माद्वेदोमहेशोहःप्रमाणंसर्ववक्तृनि।अन्यथानजडःशास्त्रोऽतींद्रियार्थस्यसा
धकः।मेरुपार्श्वेतपस्तप्त्वादृष्ट्वांशुंजगद्गुरुं।अयंधर्मोमयाज्ञातस्तत्तत्स्यप्रसादतः।अथ
किंबहुनोक्तेनमुनींद्रावेदवित्तमाः।मुक्तिसाधनविज्ञानंवेदादेवनचान्यतः।वेदमार्गोऽ
नितंतुवेदनंदोषहीनमतिशोभनंसदा।अन्यमार्गोऽनितंविचारतोवेदमार्गस्तुविकार

णंक्रमात्।यथामातास्वपुत्रस्यसत्यमेवाभिभाषते।तथासर्वज्ञनस्यापिसत्यंवदति
हिश्रुतिः।यथाशंभुसमोदेवोनास्तिपुण्यवतांवराः।तथावेदसमंमानंनास्तितत्रनसंशा
यः।यथाविप्रसमोमर्त्योनास्तिवेदविदांवराः।तथावेदसमंमानंनास्तितत्रनसंशायः।य
थेक्षुरसमंभोज्यंनास्तिलोकेविचक्षणाः।तथा।यथागंगासमापुण्यानदीलोकेनविद्य
ते।तथा।यथावाराणसीतुल्यापुरीलोकेनविद्यते।तथायथाहरसमोदेवोनलोकेन
विद्यते।तथा।षडक्षरसमोमंत्रोयथालोकेनविद्यते।तथा।यथागुरुसमस्त्रातानास्तिसं
सारगागरात्।तथा।अतश्चसंक्षेपमिमंवदामिश्रुतिःप्रमाणंशिवएवकेवलः।वरिष्ठभक्तः
सितभस्मगुंडनंविष्णुर्हविद्यावनचेतरत्परं।कूर्मरूपीमहाविष्णुःकौर्मेवेदस्यवैभवं।प्रो
क्तवान्रूपयाशुद्धयानुग्रहंतत्परः।श्रुतिसाहाय्यरहितमनुमानंनकुत्रचित्।निश्चयात्सा
धयेदर्थंप्रमाणांतरमेवच।श्रुतिस्मृतिसहायंयत्प्रमाणांतरमुत्तमं।प्रमाणपदवींगच्छे
न्नात्रकार्योविचारणा।ऋचोयजूंषिसामानितथैवाथर्वणानिच।छंदांसिरूपमित्येषो

शक्तिरव्यया।अतोन्यानितुशास्त्राणियथिच्यांयानिकानिचित्।तानितेषुरमतेर्धीरःपाषंडीनाय
तेततः।वेदार्थविन्नरैःकार्यंयत्नंतमुनिभिःपुरा।सज्ञेयःपरमोधर्मोनान्यशास्त्रेषुसंस्थि
तः।तत्रैवपार्वतीप्राहहिमवंतंकृपाबलात्।ममैवान्यापराशक्तिर्वेदसंज्ञापुरातनी।ऋ
ग्यजुःसामरूपेणसर्गादौसंप्रवर्तते।ममैवचगुह्यार्थंवेदानांभगवानजः।ब्राह्मणाद्यै
र्नृसंसर्गाथस्वस्वकर्मण्ययोजयत्।येनकुर्वंतितद्धर्मंतदर्थंधर्मनिर्मितं।तेषामधस्तान्नर
कांस्तामिस्रादीनकल्पयत्।अनादृत्यतुयःकश्चिच्छास्त्रंधर्माभिधायकं।अन्यत्रमतेसो
दनंभाष्यादिज्ञोतिभिः।यानिशास्त्राणिदृश्यंतेलोकेऽस्मिन्विविधानितु।श्रुतिस्मृतिवि
हीनानिनिष्फलानितेषांहितामसी।कापालंभैरवंचैवयामलंवामसंज्ञितं।एवंविधानिचान्यानि मो २०
हनार्थानितानितु।येकुशास्त्राभियोगेनमोहयंतीहमांनवान्।मयासृष्टानिशास्त्राणिमो
हायैषांसवांतरे।नग्नस्वरूपंकथनंद्वारावत्यांवसंबभौ।प्राहविष्णुपुराणेतुमैत्रेयस्यपरा
शरः।ऋग्यजुःसामसंज्ञेयंत्रयीवर्णाहतिर्द्विज।एतामुपस्तितोमोहात्सनग्नःपातकीस्म

तः।त्रयीसमस्तवर्णानांद्विजसंवरणंयतः।नग्नोभवत्कस्मितायामतस्तस्यामसंशयं।
इदंचश्रूयतामन्यद्यज्ञीयमहात्मने।कथयामासधर्मज्ञोवसिष्ठोनःपितामहः।मयापि
तस्यगदतःश्रुतमेतन्महामते।नग्नसंबंधिमैत्रेययत्पृष्टोहमिहत्वया।देवासुरमभूद्यु
द्धंदिव्यमब्दशतं पुराद्विज।यस्मिंश्चपराजिताद्देवादैत्यै पुरोगमैः।क्षीरोदस्योत्तरंकू ॥ ४
लंगत्वातप्यंतवैतपः।विष्णोराराधनार्थंचजगुर्ध्येयंस्तवंतदा।संप्रस्थसर्वभूतानिदे
वादीन्यपिशोषतः।नत्यत्यंतेक्षयरूपंतस्मैरुद्रायात्मनेनमः।यन्नःशरीरेऽयदन्यद्देहेरो
षवस्कघजमक्षरंयत्।यस्मान्नकिंचिद्यतिरिक्तमस्तिप्रलयस्वरूपायनमोस्तुतस्मै।सकश्च
मिदमजस्यरूपंपरमंपदात्मवतःसदातनस्य।तमनिधनमशेषचेष्टाभूतंप्रभुमळंप्र
णतोस्मिवासुदेवं।स्तोत्रस्यास्यावसानेतुददृशुःपरमेश्वरं।शंखचक्रगदापाणिंगरुडस्थं
सुराहरिं।तमूचुःप्रणतादेवाःप्रणिपातपुरःसरं।प्रसीदनाथदैत्येभ्यस्त्राहित्रराणार्थि
नः।त्रैलोक्ययज्ञभागश्चदेयोर्ध्वदपुरोगमैः।इतंनोब्रह्मणोप्राज्ञमुद्यंश्चरमेश्वर।नशक्या

स्तेभ्योहंतुमस्माभिस्तपसाहृताः।तमुपायमशेषात्मन्नस्माकंदातुमर्हसि।येनतानसु
राव्हंतुंभवेमक्षगवन्नस्माः।इत्युक्तोभगवांस्तेभ्योमायामोहंशरीरतः।समुत्पाद्यददौवि
ष्णुःप्राहचेदंसुरोत्तमाः।मायामोहोयमखिलान्दैत्यांस्तान्मोहयिष्यति।ततोवध्याभविष्यं
तिवेदमार्गबहिःकृताः।इत्युक्ताःप्रणिपात्यैनंययुर्देवायथागतं।मायामोहोपितैःसार्द्ध
ययौयत्रमहासुराः।ततोदिगंबरोमुंडोबर्हिपत्रधरोद्विज।मायामोहोसुरानश्लक्ष्णमिदं
ववचनमब्रवीत्।कुरुध्वंममवाक्यानियदिमुक्तिमभीप्सथ।अर्हंतंधर्ममेतंचमुक्तिद्वारमपाव
तंएवंप्रकारैर्बहुभिर्मुक्तिदर्शनतर्कितैः।मायामोहेनतेदैत्यावेदमार्गादपाकृताः।
अर्हतेममक्षोधर्ममायामोहेनतेसुराः।प्रोक्तास्तमाश्रिताधर्मंमार्हतास्तेनतेभवन्।च
याधर्मसमुत्सर्गंमायामोहेनतेऽसुराः।कारितास्तन्मयाख्यासंतथान्यैतत्रबोधिताः।तैर
प्यन्यैतथैवोक्तायथैवोक्तास्तथैवते।अन्योन्यहोभिःसंत्यक्तादैत्यैःप्रायशस्त्रयी।अन्या
न्यप्यैपारवंड्यप्रकारैर्बहुभिर्हिज।दैत्यान्मोहयामासमायामोहोतिमोहकृत्।स्वल्पेने

वहिकालेनमायामोहेनतेऽसुराः।मोहितास्तत्यजुःसर्वांत्रयीमार्गाश्रितांकथां।केचिन्नि
दांचवेदानांदेवानामपरेद्विज।यज्ञकर्मकलापस्यतथान्येद्विजजन्मनां।इत्थमुन्मार्गपाते
षुतेषुदैत्येषुतेऽमराः।उद्योगंपरमंकृत्वायुद्धायसमुपस्थिताः।ततोदेवासुरंयुद्धंपुनरे
वाभवद्विज।हताश्चतेसुरादेवैःसन्मार्गेपरिपंथिनः।श्रूयतेचपुराख्यातोराजाज्ञातध
नुर्भुवि।पत्नीचशैव्यातस्याश्चदतिधर्मपरायणा।पतिव्रतामहाभागासत्यशौचदया
न्विता।सर्वलक्षणसंपन्नासंपन्नाविनयेनच।सतुराजातयासार्द्धंदेवदेवंजनार्दनं।आ
राधयामासवर्षंपरमेणसमाधिना।होमैर्जपैस्तथादानैरुपवासैश्चसत्कृतः।प्रजाभिथा
नुदिवसंतन्मनानान्यमानसः।एकदातुसमंस्नातौतौतुभार्यापतीजले।भागीरथ्याःसमु
त्तीर्णौकार्त्तिक्यांसमुपोषितौ।पाषंडिनमपश्येतामायांतंसंमुखंद्विज।चार्वाकस्यतुतस्या
सोसखाराज्ञोमहात्मनः।अन्तस्तौरवात्तेनसहालापमथाकरोत्।ततुसावाग्यतादेवी
तस्यपत्नीपतिव्रताउपोषितास्मीतिरविंतस्मिन्नदृष्टेदर्शच।समागम्ययथान्यायंदं

यत्नतोयथाविधि। विष्णोःपूजादिकंसर्वंकृतवंतोद्विजोत्तम। काळेनगच्छताराजाममारा
ज्ञीसपत्नजित्। अचारुरोहतंदेवीचिताच्छंभूपतिंपतिं। सतुतेनापचारेणश्वाजज्ञेवसु
धाधिपः। नयोषितेनयाषंढःसंभाषोयत्कृतोभवत्। सापिज्ञातिस्मराजज्ञेकाशिराजसु
तासुभा। सातुविज्ञानसंपूर्णासर्वलक्षणपूजिता। प्रमाणपूर्वमाहेदंप्रियंतंकुयोनिजं।
पाषंडिनंसमाभाष्यतीर्थस्नानादनंतरं। प्राप्तवान्कुत्सितांयोनिंकिंनस्मरासितंप्रभो। तये
वंस्मारितेतस्मिन्पूर्वजातिकृतेतदा। दध्यौचिरमथाचापिनिर्वेदमतिदुर्लभं। निर्विण्णचित्तः
सततोनिर्गत्यनगरान्ततः। मरुत्पतनंकृत्वासागर्ळंयोनिमागतः। पुनस्तयोक्तंज्ञात्वास्त
त्संस्तवतांवर। काननेसनिराहारस्तत्याजस्वकळेवरं। भूयस्ततोद्दकंजातंगत्वातंनिर्जे २२
नेवने। स्मारयामासभर्तारंपूर्वदृष्टमनिंदिता। स्मारितेनतदात्यक्तंतेनासीद्घ्रतांगतः॥
अथापासापुनश्चैवंबोधयामासभामिनी। ततःकाकत्वमापन्नंसमनंतरजन्मनि। उवाच
तंसाभर्तारमुपलभ्यात्मयोगतः। एवमेवापिकाकत्वेस्मारितःसपुरातनं। तत्याजभूपतिः

प्राणान्मयूरत्वमवापच। ततस्तज्जनकोराजावाजिमेधंमहाक्रतुं। चकारतस्यावीर्ये
स्नापयामासतंसदा। सस्नौस्वयंचतच्चंगंस्मारयामासचापितं। स्मृतजन्मक्रमःसोथत
त्याजस्वंकळेवरं। अजेचजनकस्यैवपुत्रोसौसुमहात्मनः। स्वयंवरेकृतेसातंसंप्राप्तंप
तिमात्मनः। वरयामासभूयोपिभर्तृभावेनभामिनी। बुभुजेचतयासार्द्धंसभोगान्पनंदनः। ३४
तत्याजसुप्रियान्प्राणान्संग्रामेधर्मतोनृपः। ततश्चैतान्भूयोपिभर्त्रीसाभ्यभेदणा।
अचारुरोहविधिवत्तथापूर्वमुदापतिं। ततोवापतयासार्द्धंराजपुत्र्यासपार्थिवः। ऐंद्रनाग
त्यवैलोक्यवैकामान्कामदुघोदयान्। एषपाषंडसंभाषदोषःप्रोक्तोमयाद्विज। तस्मात्पा
षंडिभिःपापैराळापंस्पर्शनंत्यजेत्। विशेषतःक्रियाकाळेयज्ञादौवापिदीक्षितः। क्रियाहानिर्ग
हेयस्यमासमेकंप्रजायते। तस्यावलोकनात्सूर्यंपश्येतमतिमान्नरः। किंपुनर्यस्यसंत्यक्ता
त्रयीसर्वात्मनाद्विज। पाषंडसाग्निभिःपापैर्वेदबाह्यैर्विरोधिभिः। पाषंडिनोविकर्मस्थान्वै
डाळव्रतिकावैरागान्। हैतुकान्बकदंभीश्चवाङ्मात्रेणापिनार्चयेत्। दूरापास्तस्तसंसर्गःसेहा

स्याचार्तिपार्तिभिः। पाषंडिभिर्दुराचारैस्तस्मात्तान्परिवर्जयेत्। एते नग्नास्तवाख्याताऽष्टाश्चा
च २ हासपीतकाः। तेषांसंभाषणात्सद्यःपुंसांपुण्यंविनश्यति। वेदमाहात्म्यवाक्यानिसंत्यज्या
पिभूरिशः। तथापिग्रंथबाहुल्यभावादेवोपरम्यते। एकःसुपर्णःससमुद्रमाविवेशसइदं
विश्वंभुवनंविचष्टे। तंधीरानेमनसापश्यमंतितस्तंमातारेह्मसउरेह्मातरं। ज्ञात्वाकारं
परंब्रह्मतस्मिन्क्षणेयदक्षरं। तद्विज्ञानक्षरंध्यायेद्यदीच्छेच्छांतिमात्मनः। इतिवेदवेदितव्यंतु
ज्ञात्वब्रह्मपरंचयत्। ज्ञात्वब्रह्मणिनिष्णातःपरंब्रह्माधिगच्छति। तंवोपनिषदंनावेदविन्नमिति
श्रुतिः। मोक्षकाचार्यमुक्त्यादिरत्नरत्नाकरोदरे। पराद्रिरूपेविद्रूपेश्रुतेमातनेमोक्षते।
महातर्जगतांमातःसर्वभूतहितैषिणि। भोश्रुतेकरुणासिंधोभूयाभूयानमोस्तुते। मदज्ञा
नानुसारेणबोधयित्वापुनःपुनः। श्रद्धांध्वांतासिकारुण्यात्ययतस्तत्प्रयतांश्रुते। षण्मुनींद्र
कृताकृत्यज्ञापपापामयौषधे। ग्रंथेस्मिन्प्रथमांशोयंप्रथमोध्यायईरितः। श्रीकाळहस्तिनाथा
यशिवायपरमात्मने। मोक्षकायेममध्यायमर्प्यास्यंतरात्मने॥ ॥छं॥

श्रीमद्राजाधिराजगुरुसार्वभौमश्रीमद्राजाधिराजश्रीरामराजसरस्वतीमुनिवर्यचरणारविंदसंभवमहोदयमक
रंदमाधुर्यानुभवश्रीसांबमहादेवप्रेरितब्रह्मानंदसरस्वतीमुनिविरचितवेदार्थ
सारसंग्रहेदिकांतेममविदग्धमनोहरेमंदबुद्धास्तिकाभागधेयपुरुषा
र्थप्रकाशकेग्रंथमांशोवेदोत्कर्षपदेशोनामप्रथमोध्यायः॥ ॥छं॥
ॐनमोब्रह्मणे

॥वेदांतश्रवणोत्पन्नविद्यावेद्यमतात्मने
परमाद्वैतरूपायसाक्षिणेशांभवेनमः॥१॥विस्तरेणवेदार्थंवक्तुंशक्नोतिको महेश्वरः। तत्प्र
सादेनवेदार्थसंग्रहेणब्रवीम्यहं॥वेदार्थःपरमाद्वैतमेवसम्यङ्निरूपणं। नद्वैतंनविशिष्टै
क्यंनेवास्तिसंशयः। प्रत्यग्रूपंपरंब्रह्मसच्चिदानंदलक्षणं। स्वगतादिभिदाशून्यंपर
माद्वैतमुच्यते। जीवेश्वरौशिवेभिन्नौमोहाभिन्नौयतस्ततः। वेदार्थःपरमाद्वैतमित्यक्लेर्युज्य
तेनवै। भवेभिन्नत्वमन्योःकथंवदमहामते। संसारित्वाज्जीवस्यसंसारित्वाच्छिवस्य
वै। तत्वतस्तर्हिनीशस्यैक्यंमोहेकथंवद। स्याद्भेदोमोहमहैक्यंवेदोक्तिश्चळसाधनैः।

तर्हि साधनसाध्ये शैक्यं नश्यति सदादिवत्। स्वसंहितायां स्तेनाप्ययं पक्षो निराकृतः।
जीवत्वं चेतनस्यास्य स्वाभाविकमिति द्विजाः। केचिदिच्छंति वाङ्मात्रं तेषां प्रत्यासज्यते यदि
स्वाभाविकं तर्हि जीवत्वं सर्वदाभवेत्। नास्तितस्य निवृत्तिर्हि स्वतः सिद्धं ननश्यति। यथाग्नेरौ
ष्ण्यसंपर्कान्नाम्नस्य मळनाशनं। तथाजीवस्य दुःखादिनिवृत्तिः केनचिच्चेत्। रसविद्धमयः सु
वर्णं यथाभवति सर्वदा। केनचित्साधनेनैव तथाजीवः शिवोभवेत्। इति केचित्स्वमोहेन
वदंतिकुवादिनः। तन्नसंप्रतिपन्नंहि स्वतः सिद्धं ननश्यति। यथा स्वाभाविकं वह्नेरौष्ण्यं
वह्निनश्यति प्रकाशोवा तथास्यापि नदुःखादिर्वै नश्यति। मणिमंत्रौषधादीनां राक्षसैश्चि
त्रमात्रतः। नष्टवस्तुतिबद्धंस्यान्ननष्टं संमतंहितत्। तथानाम मळोनैवकेनचित्प्रविनश्य
ति। नष्टवस्तुतिबद्धोहि विनष्टं मन्यतेबुधः। जीवत्वं चतथास्यापि सुखदुःखादिलक्षणं। नष्ट
वस्तुतिबद्धंस्यान्नैवनश्यतिकेनचित्। पयसावेष्टितंतोयं पयइत्यभिधीयते। रज्जुतंकांचना
यस्तंहेमइत्यभिधीयते। तथैवरसवीर्यंएवद्रविसंपर्कतो[illegible]पिवा। अयसोहेमवर्णःस्यान्न

हेमत्वंकदाचनारसवीर्यं विनाशेतुवर्णस्तस्यविनश्यति। कुवकस्यननित्यत्वमितिवार्त्तीभु
विस्थिरा। तथापिमानबाध्यांत्याकांचनंमन्वतेजयः। सूक्ष्मदर्शिनहीनानांसुलभःखलुवि
भ्रमः। तथाशिवत्वंजीवस्यभ्रांत्यासंबोधविध्वंसि। साधनेनस्वतोजीवोनशिवःसर्वथाभवेत्।
स्वतोशिवःशिवःसाक्षान्नभवेत्कुकदाचन। शिवएवस्वतःसाक्षाच्छिवोभवतिनान्यथा। यथैवव
ह्निसंपर्कान्नतोयंवह्निरुक्तः। उष्णतोयमितिप्राज्ञाः प्रतातमपिदेहिनां। यथाशिवःस्वतोजी
वःकदाचित्संहितोन्नमाः। शिवत्वेनप्रतीतोपिस्वतोनैवशिवोभवेत्। केनचित्साधनेनैवमुक्तः
शिवसमोभवेत्। इत्येवंकेविदिच्छंतिवादिनोमुनिसत्तमाः। वार्त्तामात्रमिदंप्रोक्तंसर्वथानत
दर्थवत्। एकदेशोनवाजीवः किंवासर्वात्मनासमः। एकदेशोनचेत्सर्वेशिवाःसंसारवर्त्तिनः।
एकदेशोनसर्वेषामस्तिसाम्यंशिवेनहि। सर्वात्मनाचेत्साम्यंतत्सर्वथाशिव एवसः। भेदका
कारभूत्यत्वाज्जडाभावाच्चवस्तुनः। किंचमुक्तोशिवेनैवसमोजीवोभवेद्यदि। कंचित्कालंतु
तत्साम्यमागतंस्वल्पुनश्यति। तस्माज्जीवःस्वतःसाक्षाच्छिवःसत्यादिलक्षणः। एकदेशिमतंसर्वं

शास्त्रेषेवनिराकृतं।तेदार्थेयरमाद्वैतमित्युक्तिर्युज्यतेततः।परब्रह्मस्वरूपत्वात्प्रकृतः
पुरुषस्यच।स्वगतारव्यभिदानात्रेयुक्तिर्युक्तिमतीनचेत्।विरूपब्रह्मरूपत्वंजगयाःप्रकृते
र्नहि।प्रकाशरूपतानांधतमसोस्तियथातथापुरुषस्यत्वयोक्ताथपरब्रह्मस्वरूपता।सेष्ठ
ममापिकोवात्रभेदहेतुःयश्चोवद।भेदहेतूपाध्यभावेयेकल्पनयोस्तयोः।भेदोस्तिव
दन्प्राज्ञोभवान्सर्वज्ञएवहि।ऐक्याभावात्प्रधानस्याभेदेनपुरुषस्यच।विशिष्टमेवब्रह्मेति
वार्त्तावार्त्तवकेचलं।ब्रह्मणश्चविशिष्टलंजीवात्यादिकंतथा।पंचराजादिशास्त्रोक्तंविरुद्धं
स्यखिलंश्रुतेः।जीवस्योत्पत्तिमत्वेस्यान्नित्यत्वंचभवेद्ध्रुवं।तदास्यात्कृतनाशादिसंज्ञोमोक्ष
स्यनेवहि।नात्माश्रुतेर्नित्यत्वाच्चताभ्यइत्युक्तएवहि।जीवोत्पत्तिंसूत्रकारःप्रत्यषेधदतिस्फु
टंकरणस्योत्पत्तेरापकर्तुंनैवोपपद्यते।वांस्यादिकरणोत्पत्तिस्तत्रणएवनदृश्यते।अथ
संकर्षणादीनामोशभावेपिनोऽवः।बलीशाकृत्यानर्थक्यंस्याद्यद्येतेविलक्षणाः।सिद्धोनहा
निश्चभवेदैक्यस्यांगीकृतत्वतः।एकस्यचत्वारोव्यूहास्तत्रव्यूहमणएवचेत्।तदाप्यतिशयाभा

वात्तेषामुत्पत्तिसंभवः।निर्विशेषतयैवैतेपंचरात्रेनिरूपिताः।नचतुर्व्यूहतायुक्तानैकव्यू
हतोहरेः।ज्ञानस्यगुणताकृत्स्न्यादिविरोधाश्चनेकशः।अस्मिन्शास्त्रेभवेत्सेववेदनिंदा
चविद्यते।तस्माद्वैलक्षण्यमस्तसंगतेवहिसर्वथा।जीवात्मनामनेकेषांप्रधानस्यचतत्वतः।स्व
गताद्भिदाभ्रष्यंब्रह्मैक्यंनैसंगता।इतिचेत्सच्चिदानंदरूपत्वमखिलात्मनां।समभेवद्य
स्तेषांमनेकत्वंकुतोवद।यद्येकएवजीवात्मावामदेवादिमुक्तितः।मुक्ताअपिवयंतर्हिज
गज्ज्ञानंकुतोधुना।इतिचेन्नवपक्षेपिदोषायंसमएवहि।क्रमेणानंतजीवानांसांख्ययोगप्र
सादतः।अतीतानंतकल्पेषुमुक्तत्वेनैवहेतुना।अंगीकृतेप्यात्मभेदेत्यक्तेनव्यवस्थितिः।
आत्मैकत्वेपिबंधादिव्यवस्थास्त्येवमन्मते।व्योमवत्सर्वदेहेषुव्याप्तःसान्येकएवहि।सएवसू
र्यवत्सर्वबुद्धिषुप्रतिबिंबितः।बहावभासेप्रत्यक्षेनरूपाधिविदात्मनि।सोपाधिकात्ममुक्त
त्वावभासोविश्वमस्तवभुक्तादिमुक्तिश्रुतयःप्रत्यक्षेणविरोधतः।अर्थवादात्मनिबुधैरुच्यंते
ब्रह्मविन्नमेः।मुक्तानांमुच्यमानानांमोक्षमाणांविदात्मनां।त्वयैवकल्पितत्वेनसत्येसर्वंत

रात्मनि। बंधमोक्षौ कस्यवेतिसंदेहस्तन युज्यते। एवमेवनसंदेहःप्रत्येकमखिळात्मना। ए
कएवतुरुतात्माभूतेष्वतेष्वव्यवस्थितः। एषसर्वेषुभूतेषु गूढोत्मानप्रकाशते। आत्मधीनेन
जीवेनतद्जीवोनभोयमः। इत्यादिश्रुतिवाक्येभ्यजीवैक्यंसुनिश्चितं। अतःशुकाद्यास
मेदभ्रांतिंसर्वात्मनात्यजत्र। गुरोःस्वमुक्तयेरवंडवाक्यार्थश्रवणं कुरु। सच्चिदानंदरूपत्वमंतरा
त्मशायोःसमं। भेदगंधस्मृतिरपिस्वप्नेप्यत्रनयुज्यते। परोक्षतापरिछेदौब्रह्मात्माज्ञाना
कल्पितौ। नस्वरूपंतयोर्भेदशंकापत्रनयुज्यते। विलक्षणात्मनोयस्माद्त्रिगुणाप्रकृतिर्जडा।
तस्माद्विजातीयभिदानेक्तिश्चेन्निरर्थिका। श्रुतिवाक्यंनैकमपिप्रकृतिप्रतिपादकं। अतः
सिद्धाविजातीयभिदानेक्तिरेवनः। महतःपरमव्यक्तमित्युक्ताप्रकृतिःश्रुतौ। मायांतुप्रकृ २६
तिंविद्यादजामेकांतथेतिवत्। कारणाख्यशरीरस्यवाचकंपरिशोषतः। अव्यक्तपदमित्येवं
ब्रह्मण्यक्षरवीरितं। सूत्रकृद्भाष्यकृद्भ्यांतु प्रोक्तमेतदजापदं। तेजोबन्नात्मिकांश्रौतिगमयेद्
इतिनिश्चितं। न्यायमालाकृद्भिरपिभारतीतीर्थदेशिकैः। एवमेवहिनिर्णीतमव्यक्ताजापदद

अस्यावयवस्तैस्तुव्याप्तंसर्वमिदंजगत्। एतन्मंत्रोत्तरार्द्धेक्तिरेसतिसतिसर्वथा ५

यं। महतःपरमव्यक्तंप्रधानमथवाचपुः। प्रधानंसांख्यशास्त्रोक्ततत्त्वानांप्रत्यभिज्ञया। श्रु
तार्थापत्त्यभिज्ञानात्परिशेषाच्चतद्वपुः। सूक्ष्मत्वात्कारणावस्थमव्यक्तास्यंतदर्हति। अजाह्येसां
ख्यप्रकृतिस्तेजोबन्नात्मिकाथवा। रक्तशुक्लादीलोहितादिरूप्यसौसांख्यशास्त्रगा। लोहितादिप्र
त्यभिज्ञातेजोबन्नात्मरूपाणांप्रकृतिंगमयेच्छ्रौतिमजाकृतिंमधुत्ववत्। मायांतुप्रकृतिंविद्या
न्मायिनंतुमहेश्वरं। मायाप्रकृतिशास्त्रार्थतापधानस्यनेवहि। खमतेऽखिळजीवानामीशावय
वतानहि। अवस्थमायादिशब्दवाच्यंप्रकृतेर्न[illegible]महाकाशाव्य
वताघटादीनांयथातथा। मन्मतेऽखिळजीवानामीशावयवतास्तिहि। परमार्थावयवतानि र
स्ताभ्रुतशास्त्रतः। अतःसावयवत्वाख्यदोषगंधोपिनास्तिनः। जीवेशभेदजनकोपाधिर्मायाप
दैरितः। तस्यप्रपंचोपादानं तोक्ता प्रकृतिश्रुतः। मायाविद्यातमोमोहाज्ञानाख्यार्थोमकेष्व
तः। विजातीयभिदाहीनं ब्रह्मेत्यत्रनसंशयः। ननिरूपयितुंशक्यानिस्यैषाभासतेचया। सामा
न्यतोऽजाळादीळोकाःसंप्रतिपेदिरे। तुळानिर्वचनीयावास्तवीचेत्यसौत्रिधा। ज्ञेयामाया।

ब्रह्मबोधैः श्रोतयोक्तिकलौकिकैः स्वानुभवसिद्धत्वयविरुद्धं ब्रह्मेतियुक्तमेवोक्तं
यत्तएवमतोमया। किमत्रबहूनोक्तेनभेदःसम्यक्स्वरूपणे। वंध्यात्मजस्यापुष्पशशशृंग
समंखल्वब्रह्मण्यप्यस्तिचेद्भेदःकेनवास्तुगृह्यते। अथाद्योप्यस्तिचेन्नहिवंध्यापुत्रोपिसन्नभ
वेत्। भेदसाक्षीकथंभिन्नःस्वनैवयदिगृह्यते। गृह्यतेन्येनचेद्भेदःकोनवस्तूंनिवारयेत्। भेदाज्ञा
ननधर्म्यादिविभागास्युरणुभ्रुवं। विभक्तत्वेनधर्म्यादेरभानेभेदधीर्नहि। किंचस्वयंभेदो
यंधर्मीवाथस्वरूपकं। स्वरूपंचेद्विदानेवनाशेवारभ्यतेहथा। धर्मश्चेत्सतुभिन्नोवाऽभिन्नो
वावदपंडित। भेदज्ञायीनेवस्यादभिन्नोयदिएवंवत्। भिन्नश्चेद्धर्मिणंनस्यात्घटप
टादिवत्। किंवस्यादनस्थापिपक्षेस्मिन्पंडितोत्तम। अथाधर्मसधर्मवाधर्मीयंवक्तोवद। पृ४७
अधर्मवर्त्तेधर्मेतिकोवावदेद्बुधः। सधर्मवर्त्तेधर्मइतिचेदुच्यतत्त्वया। आत्माश्रयादि
माळांतदोषान्कोवानिवारयेत्। ब्रह्मेतिभेदशून्यंस्यान्नत्रभेदयहःकुतः। भेदयहेग्रहोनस्या
द्ब्रह्मणोद्वयरूपिणः। ब्रह्मयहंनभेदोयंयहीतुंशक्यतेक्वचित्। प्रकाशेतमसोयद्वन्नैवस्था

नंभवेन्नहिब्रह्मण्येवमवस्थानंभवेन्नभेदस्योपपद्यते। प्रकाशेतमसोयद्वन्मायायास्यादनैव
स्थितिः। ब्रह्मण्यपितथाभेदोमायायेवावतिष्ठते। वस्तुतोनैवभेदोयंकोपिब्रह्मणिवर्त्तते। प्रका
शेवर्त्तेयद्वन्मोनेकत्रवस्तुतः। ततोभेदस्तुनिर्वाच्योदेशकाल्यादिभिः कुतः। वंध्यासुतस्य
माद्येयः शशृंगेवपुरेवसः। ब्रह्मणोयदिकिंचित्स्यादन्यत्तत्रभवेदयं। यदाभूत्सकळंब्रह्म
तदायंकभविष्यति। भेदोमिथ्येवदृश्यत्वाच्छुक्तिकारजतादिवत्। नानैकांतिकताहेतोश्चित्त्व
कर्मतानहिनहिभानादृतेसत्यंनत्वंभानंचितोचितः। चित्संभेदोविनाध्यासादृतेनाहम
दयः। तस्मान्नेवास्त्ययंभेदोविचाराभावतोवनः। भेदगंधासहेतत्वेमनोवाचामगोचरे। स्वा
मूर्तीनांमंत्राणांनियमोऽपिपूर्ववत्।एथक्कृत्यैकपूजायांपूजाधारानुरूपतः।प्रोक्तामंत्रामूर्त्तय
श्चयाघाएवात्रकल्पनाः।नामाधारोपचाराणांभेदमुत्कानिरूपणे।एकार्चायामनेकार्चायांच
न्यत्सकळंसमं।प्रत्याधारस्थमूर्त्तिभ्यःसर्वथात्रतुपूजकैः।हविर्निवेदनाद्योपचाराःकार्याःएथक्
एथक्।उत्तमाधमपूजांतपूजास्वत्रेशपूजकैः।कार्याःएथक्एथगुपचाराद्विनसंशयः।प्रथ
धारस्थमूर्त्तीनांवैलक्षण्येनसर्वथा।शिवप्रधानायांचोपचाराःएथक्एथक्।सर्वमूर्त्तिमतःश्रु
करस्येकत्वेपिसर्वथा।विलक्षणत्वान्मूर्त्तीनामुपचाराःएथक्एथक्।कार्याःपूजाविधानज्ञैः पू
जुकैर्न्यायवित्तमैः।पूजादिगुणकेंद्रस्यपुरोडाशप्रदानवत्।न्यायसंग्रहकारैःश्रीभारतीतीर्थ
शिकैः।अवस्थाभेदकल्पेकस्यएथक्ध्यानंसमीरितं।एकीकृत्यएथग्वास्याद्दायुःप्राणानुचिंतन
तत्रैवाभेदान्नयोरेकीकरणेनानुचिंतनं।अवस्थाभेदतोध्यात्मधिदेवंएथक्स्मृतं।प्रयोगसे
दोराजादिगुणकेंद्रप्रदानवत्।सलक्षणत्वान्मूर्त्तीनामेकत्वान्नहतोपिच।उत्तमोत्तमपूजायामुप
चाराःएथक्स्थक्कानहि।पूज्यपूजकपूजातत्फलसाधनरूपिणे।सच्चिदानंदरूपायनमःसांबा





संभवमहोदयंकरंदासुप
मधुव्रतश्रीसांबसदाशिवब्र

यशांभवे।षण्मुनींद्रकृताख्याशापपापामयौषधे।अस्मिन्ग्रंथेद्वितीयांशेचतुर्थोध्यायईरितः।
श्रीमद्भवत्सभेशायशिवायपरमात्मने।गोप्तकायेममध्यायमर्पयाम्यंतरात्मने॥

पुष्पचिद्रेपमात्रेणसंतुष्टःसंप्रयच्छति।यस्तंभजेमहादेवंसांबंसंसारभेषजं।भूयोपिदेव
देवस्यसांबस्यपरमात्मनः।वक्ष्येविधानंपूजायाःशंकरेणप्रचोदितः।स्त्रीणामपिचशूद्राणामा
स्तिकानामकामिनां।नमोंतनारायणेनचिच्छुपूजाविधीयते।नमोंतेनशिवेनैषाशिवपूजाविधी
यते।देवपूजासंकराणामारादेवाथवंदनं।स्वयमेवसमुद्भूतेऋषिसिद्धप्रतिष्ठिते।मर्त्य
प्रतिष्ठितेलिंगेशाळयामेतथैवच।शाळयामोद्भवेलिंगेबाणलिंगेचशंकरं।स्त्रियःशूद्राश्च
मोहाद्यानार्चयेयुःकदाचन।अप्रतिष्ठितशैलादिलिंगेषुक्षणिकेषुवा।चरेषुवास्त्रियःशूद्राश्चा

वेयुर्महेश्वरं। लिंगेस्वयंभुवेबाणेकृषिसहप्रतिष्ठिते। शाळग्रामशिळाचक्रेलिंगेमर्त्यप्रतिष्ठिते। प्रतिष्ठितेषुवेरेषुवेदतस्तंत्रतोथवा। अप्रतिष्ठितपुंएतल्लिंगादिष्वचसर्वथा। स्त्रीशूद्रद्विजबंधनांविस्मृत्यापिकदाचन। स्पर्शनेनाधिकारोस्तिस्पृष्टोमोहात्यतत्यधः। अयमर्थोहिहन्नारदीयेपिप्रतिपादितः। प्रायश्चित्तविहीनंकूरायप्रकरणेस्फुटं। यदाप्रतिष्ठितंलिंगंमंत्रविद्विर्यथाविधि। तदाप्रभृतिशूद्राद्यायोषिद्वाकृपिनसंस्पृशेत्। स्त्रीणामनुपनीतानांशूद्राणांवृजनश्वरा। स्पर्शनेनाधिकारोस्तिविप्रोवाशंकरेपिवा। शूद्रोवाऽनुपनीतोवास्त्रियोवापतितोपिवा। केशवंवाशिवंवापिस्पृष्ट्वानरकमश्नुते। स्त्रीशूद्राद्यैःस्पृशितंवाऽस्पृष्टंवाशिवमर्चितं। नमन्कोटिकुळैःसार्द्धमाकल्पंरौरवेवसेत्। अयमर्थश्चतत्रैवतस्मिन्प्रकरणेस्फुटं। कृपयालोकरक्षार्थंधर्मराजेनदर्शितः। यथाकथंचित्पापानांमहतांपरमर्षिभिः। शास्त्रेषुनिष्कृतिर्दृष्टाप्रायश्चित्तायुतैरपि। प्रायश्चित्तविहीनानिपापानिश्रृणुसत्पते। समस्तपापतुल्यानिमहानरकदानिवै। यःशूद्रेणार्चितंलिंगंविध्वंवाप्रणमेन्नरः। नतस्यनिष्कृतिर्दृष्टाप्रायश्चित्तादिकल्पनैः। नमेद्यःशूद्रसे

स्पृष्टंविध्वंवाहरिमेववा। ससर्वयातनाभोगीयावच्चंद्रतारकं। पाषंडएतल्लिंगंनत्वापाषंडतांव्रजेत्। राजन्वेदविदेवापिसर्वशास्त्रार्थवाद्यपि। आभीरएतल्लिंगंनत्वानरकमश्नुते। योषिद्भिःस्पृशितंलिंगंविध्वंवापिनमेनुयः। सकोटिकुळसंयुक्ताआकल्पंरौरवेवसेत्। विध्वंवाशंकरंवापिस्वाश्रमाचारवर्तितैः। अर्चितंराजशार्दूळस्वमेपिनहिपूजयेत्। यःशूद्रसंस्कृतंलिंगंविध्वंवापिनमेन्नरः। इहैवात्यंतदुःखानियश्यत्यामुष्मिकेकिमु। आभीरएतल्लिंगंविध्वंवापिजनेश्वरानमन्स्वंनाशयत्येवकिमत्रबहुभाषितैः। लिंगेस्वयंभुवेबाणेमुनिसिद्धप्रतिष्ठिते। शाळग्रामोद्भवेलिंगेशाळग्रामतथैववत्। स्पृष्टेसतिप्रमादेनस्त्रीशूद्रपतितादिभिः। कृत्वासंप्रोक्षणंतत्रयजेद्देवंविचक्षणः। संप्रोक्षणमकृत्वातुयोयजेत्तत्रशंकरं। समहायातकीज्ञेयःसंज्ञायोनाऽविद्यते। स्पृष्टंयद्यपिशूद्राद्यैर्दोषानैवेतविद्यते। शास्त्रंयद्यपितस्यस्यार्थतात्पर्यंनविद्यते। शाळग्रामशिळाबाणलिंगादिस्तावकत्वतः। स्वार्थतात्पर्यमस्त्विळबाक्यानांनियमेननाहयमेधशतसहस्राण्यथकुरुतेऽश्वघातजं। परमार्थविन्नपुण्येनैरपा

दैःस्पृशतेविमलः।यस्यनाहंकृतोभावोबुद्धिर्यस्यनलिप्यते।हत्वापिसइमाल्लोकान्नहंति
नाबध्यतेनैवतत्त्वविदःपापमस्तिमात्रैवधादिभिः।प्रागुदक्प्रत्यगाहरणाल्लोकहूयज्ञयो
श्चवेत्।इत्यादिवाक्यानांस्वार्थोस्तिकिंतात्पर्यमित्यत्र।अस्तीतिवेदहोतेमीमांसातात्पर्यवेदनं।
ज्ञानकर्मरूपकानांवाक्यानामविचारतः।स्वार्थतात्पर्यमस्तीतिवदतःकिंवदामितेसदाचा
रोपिगळितःक्रमाद्यस्यमहात्मनः।वदतश्चासदाचारंलुंडोपुछगोपतिः।स्पृष्टसतितुलिंगेच
बेरेमन्त्रैप्रतिष्ठितेपुनःप्रतिष्ठांकृत्वेशंपूजयेत्तत्रपंडितः।पुनःप्रतिष्ठांयोमोहादकृत्वातत्र
शंकरं।पूजयेत्तस्यराष्ट्रेशुनिष्कृतिर्नैवदृश्यते।स्पृष्टलिंगेचबेरेवाभूशादौरप्रतिष्ठिते।रुद्रा
भिषेकतोधीमान्विशोध्यार्चामथार्चयेत्।अलिंगमंत्रपुंसूक्तशांतिरुद्राभिषेकतः।अप्रतिष्ठित ५५
लिंगादेःशुद्धिःस्यान्नात्रसंशयः।तंत्रतःस्थापितेदेवतायेपूज्यैववैदिकैः।इतिसूतःस्वगीतायां
सर्वज्ञःकृपयोक्तवान्।तंत्रोक्तेनप्रकारेणदेवतायाप्रतिष्ठिता।सापिवंद्यासुसेव्यावपूजनीया
चवैदिकैः।शुद्धमेवहिसर्वत्रदेवतारूपमास्तिकैः।तत्रमंत्रोक्तपूजातुतंत्रनिष्ठस्यकेवळं। तंत्र

देवास्थापितलिंगादेःसत्यामुपहतौतथा।देवस्यपूजोपहतौकुर्यात्तंत्रोचितंबुधः।तदप्यिश्वावा
यवीयसंहितायांसमीरितं।लोकार्थंश्रोत्रशावायश्चक्रेछायोपमन्युना।अत्यंतोपहतंलिंगं
विशोध्यस्थापयेत्पुनः।संप्रोक्षयेदुपहतंमनागुपहतंयजेत्।लिंगानिबाणसंज्ञानिस्थापनी
यानिवानवा।तानिपूर्वोक्तवेनैवसंस्कृतानियतस्ततः।रौहाणिस्थापनीयानियानिदृष्टानिबाण
वत्।स्वयमुद्भूतलिंगेचदिव्येवार्षतथैवच।अपीठेपीठमावेश्यकृत्वासंप्रोक्षणंविधिं।यजेत्र
त्रिशिवंतेषांप्रतिष्ठानावसीयते।दग्धंभ्रष्टंस्तंभगंचक्षितेर्लिंगंजळाशये।संधनयोग्यंसंधाय
प्रतिष्ठाविधिमाचरेत्।बेराद्याविकळाल्लिंगादेवंपूजापुरःसरं।ब्रह्मस्थहृदिसंधानंत्यागंवायु
क्रमाचरेत्।एकाहपूजाविहतौकुर्याद्द्विगुणमर्चनं।द्व्यहेतुमहापूजांसंप्रोक्षणमतःपरं।मा
सार्धमनेकाहंपूजायदिविहन्यते।प्रतिष्ठेवेष्यतेकेचित्केचित्संप्रोक्षणक्रमः।संप्रोक्षणे
लिंगादेर्देवमुद्वास्यपूर्ववत्।संप्रोक्षणविधिंकृत्वातत्रावाह्यार्चयेद्धरिं।अलब्धस्थापितलिंगे
बेरेवाक्षणिकंबेरं।शुचौस्थळेजळेवक्षीरवोर्व्यामिशिवंयजेत्रुद्रविष्णोःप्रतिष्ठाविधानंक च

ग्राह्यिना कल्पसूत्रेभगवताप्रोक्तंबौधायनेननुअथातोरुद्रप्रतिष्ठाकल्पंव्याख्यास्यामश्चतु
र्थ्यामष्टम्यां मथभरण्यांवायानिचान्यानिपुण्योक्तानिनक्षत्राणितेषुपूर्वेद्युरेवयुग्मान्ब्राह्मणा
नन्नेनपरितोषयित्वापुण्याहंवाचयित्वासमागतायांनिशायांकपिलापंचगव्येनसहिरण्यय
वद्रूर्वांकुराश्वत्थपलाशशमीपर्णनसोदकानंप्रतिकृतिंकृत्वाभिषिंचायोहिष्ठादियवमानस्वर्जनस्त्ये
तेनव्याहृतीभिःपुष्पफलाक्षतमिश्रैर्यवद्रूर्वांकुरंपादपीठेनिक्षियतिनमस्तेरुद्रमन्यवइतिप्रति
सरंबध्नातिरक्षोहणंवाजिनमित्यर्थेनंनदीतटाकह्रदनिर्झरसरित्तीर्थानामन्यतमेघहतेनवा
ससाकुशबर्हमाछाद्याभिवासयत्यवतेहेडठउग्रमित्यर्थोभ्रातेस्नाताहतवाससश्चत्वारो
ब्राह्मणाःप्रतिमामुलापयेयुरुन्निषञ्चहुतीभवेत्यर्थश्वोसमेदश्चोसमवस्नाप्यन्नि[illegible]भारुद्रगा
यत्र्यादिगोमूत्रंगंधद्वारेत्यापायस्वेतिदधिक्रावणोतिष्टुक्रमसीतिदेवस्यत्वेतिकुशोदकमित्येतेन
पंचगव्येनाभिहनमस्तेअस्तुधन्वनइत्यष्टाभिःस्नापयतिशमीपलाशशाखापीदिरश्वत्थइत्यादिसमु
दाहृत्यपूर्ववत्पर्णशकलेनाभिषिंचयत्यश्वत्थेवोनिषदनमित्येतेनमणिमुक्ताप्रवाळानामन्यु

[illegible]गोमय ३ पयः ३ दधि ३ आज्यं ३ स्वा २

नि २

निमज्यकलशेनाभिषिंचतिहिरण्यवर्णइतिपूर्वोक्तेनहिरण्येनतेजसाचक्षुर्विमोचयेत्तेजो
सीतिस्त्रिंगंधेनिवर्त्तयेत्तेवदनुषोभावादधिदेवयजनोस्वरवेप्रत्यग्निमुखात्कृत्वायातश्चक्षुशि
वतमेत्येतादनुवाकस्याज्याहुतीरुपजुहोतिद्वाभ्यांसहस्राणीत्येताभ्यांचप्रत्यृचंसर्वावैकहुड्ड
तिपादयोस्यशोदपुनस्ताभिरेवाज्याहुतीर्जुहुयाद्धुडायेतिनाभिदेशस्यशोदपुनस्ताभिर्नमो
रण्यबाहवइतिमूर्द्धस्यशोदपुनस्ताभिर्नमःसहमानायेतिसर्वांगमुपस्यशोदरुद्रहोमंततउद्धृत्य
ज्ञातवेदसमित्फलाप्यपंचब्रह्मसंज्ञकेनपंचानुवाकैसंघातेनदेवताळयंप्रविश्यमणिमुक्ताप्रवा
छसुवर्णरत्नानिपादपीठेनिवेदयतिनमस्तेरुद्रमन्यवइतिरुद्रंस्थापयेदथगंधपुष्पधूपदी
पाद्याकाशोन्मुखानिकृत्वोद्वाहनंकरोतिप्रणवयुक्तैर्व्याहृतीभिर्व्यस्तैःसमस्तैश्चओंभूःपुरुषमा
वाहयामीत्यादिभिरावाहयेत्कलशेनाभिषिंचतिप्रणवेनपारयेद्ब्रह्मेतिविज्ञायतेप्रणवेन
कूर्चंददातिदूर्वांकुरपर्णीशमीकाश्मर्यपर्णकलशेनार्घंददातितिळलवंगकंकोळकलशेना
चमनंददातिआपःशिरकुशाग्रैश्चाक्षतैर्यवैःसिद्धार्थैश्चार्घंददातीमाआपःशिवतमाःएताःएत

तमामेध्याअमृताअमृतरसाःपाद्याआचमनीयाअर्घ्यास्ताञ्जुषतांप्रतिगृह्णतांप्रतिगृह्णातुमहा
देवायरुद्रायनमस्तथाबायादिभिःपुष्पादिद्यात्तैरेवतर्पणंकृत्वाकुसरंयायसंगुडोदनंह
रिद्रोदनमितिहवींषिकुसैरमिश्रमाज्यंजुहुयात्सवायस्वाहामहतेदेवायस्वाहामहतोदेव
स्यपत्न्यैस्वाहाऽर्द्धंबकंमानोमहांतंमानस्तोकेतनयेआरात्तेगोघ्नविकिरिदविलोहितसहस्वा
णिसहस्त्रधाशतिधादशानामभिःनमःशिवायशंकरायसहमानायशितिकंठायकपर्दिनेत्रिनेत्रा
यारुणायापगुरमाणायहिरण्यबाहवेसस्पिंजरायत्र्यंबकेशायहिरण्यगर्भायस्वाहेतिसिष्टकृत्प्रभृ
तिसिद्धमाधेनुवरप्रदानाद्धरिद्रोदनंबलिमुपहरतित्वमेकमाद्यंपुरुषंपुराणंरुद्रंशिवंविश्वस्र
ष्टंयन्नामहेत्वमेवयज्ञोवितताविधेयस्तन्मात्मनात्मप्रतिगृह्णीघहव्यमित्ययेणाग्निमभ्यर्च्यपर्णे ६७
षुकृत्तशोषंनिदधातिभूर्भुवःस्वरितिगुडोदनंहरिद्रोदनंब्राह्मणान्भोजयित्वाशिषोवाचयि
त्वाविश्वतुवोप्रदक्षिणंसहाग्निंपरिक्रमयतिविश्वभुजेनमःसहस्रभुजेनमआत्मनेनमःपर
मात्मनेनमइतिसंतिष्ठतेप्रतिष्ठाविधिः॥ ॥अथातःप्रतिष्ठाकल्पंव्याख्यास्यामोदर्शपौर्णमासाद

दर्शंवाश्रवणायांवायानिवान्यानिशुभनक्षत्राणितेषुपूर्वेह्नरेवयुग्मान्ब्राह्मणान्नेनप
रितोष्यपुण्याहंस्वस्तिऋद्धिमितिवाचयित्वासमागतायांनिशायांकपिलापंचगव्येनपूर्वोक्तरा
त्रौबलपलाशपर्णानसुवर्णोपधानंप्रतिकृतिंकृत्वाभिषिच्यापोहिष्ठामयोभुवइतितिसृभिर्हि
रण्यवर्णाःशुचयःपावकाःइतिचतसृभिःपवमानःसुवर्जनइत्येतेनानुवाकेनमार्जयित्वाव्याह
तिभिर्हवींषिबलाक्तमिश्रैर्यवैर्वोकुरंपादयोर्निहतीरंविष्णुर्विचक्रमइतिप्रतिसरंबध्नाति
रक्षोहणंवाजिनमित्यथैनंदीप्तदाकड्दानैरसरिन्नीर्थानामन्यतमेघृतेनवाससाकुश
बंधमाद्यधिवासयत्यवतेहेडउद्यन्नमित्यथश्वोभूतेस्नाताहतवाससश्चत्वारऋत्विजोब्रा
ह्मणाःप्रतिमामुद्वापयेयुःवन्निष्ठब्रह्मणस्पतइत्यथश्वोसमेदेशेसमक्षायगायत्र्यागव्यगो
मूत्रंगंधद्वारेतिगोमयंआप्यायस्वेतिचतस्रोदधिक्राव्णोतिदधिक्रावेत्यस्यतेतिकु
शोदकमित्येतेपंचगव्यंनामाहकपिलायाःपरंस्त्रीरंश्वेतायाःपरंदधिरक्तायाःपरंत्वाज्यंशोषण
त्रावल्कलशयोरित्यावोराजानमितिस्नापयतिशमीपलाशखादिरबिल्वाश्वत्थविकंकतन्यग्रो

वेतसाधशिरीषोडुंबरसर्वयाज्ञिकवृक्षापांवर्मकषायकलशेनाभिषिंचतिअश्वत्थेवो निष
दनमित्येनमणिमुक्ताप्रवाळानामभ्युनिमज्यपूर्णकलशेनाभिषिंचतिहिरण्यवर्णाइतिपूर्वो
क्तेनतेजसावत्सुर्विमोवर्चसेतेजोसीत्यथदेवयज्ञनोक्तुरवनप्रभृत्याग्निमुखवाक्कृत्वापुरुषसूक्त
नाड्याऋतीर्छुकुयात्वविछ्वार्नुकमितिनाभिदेशस्यशोदिदंविछुरितिपादयोःस्यशात्पुनस्तेने
वाड्याऋतीर्छुकुयादतोदेवाअवंतुनइतिमूर्द्धिस्यशोत्पुनस्तेनेवाड्याऋतीर्छुकुयात्एवंऋतीर्छु
वींगमुपस्यशात्पौरुषेणसूक्तेनहोमंततःउडुत्यंजातवेदसमित्कलाप्यशाकुनसूक्तेनदेवो
ळयंप्रवेश्यमणिमुक्ताप्रवाळसुवर्णरजतानिपादपीठेनिपातयत्यतोदेवाअवंतुनइतिवि
छुंस्थापयेत्। अथगंधपुष्पधूपदीपैरभ्यर्चीकाशमुखंकृत्वोत्थायवाहनंकरोतिप्रणवेनवार
येत्। ब्रह्मेतिविज्ञायतेप्रणवेनयुक्तोव्याहृतिभिर्व्यस्तैःसमस्तैश्चॐभूःपुरुषमावाहयाम्यॉंभु
वःपुरुषमावाहयाम्यॉंसुवःपुरुषमावाहयामीम्यॉंभूर्भुवःसुवःपुरुषमावाहयामीत्यावाह्यरत्नां
बुकलशेनाभिषिंचतिप्रणवेनकूर्चंदद्याद्वीविछुपर्णीस्थांपद्मपत्रकलशेनयार्घ्यंददातिलवं

DR BHAU DAJI LIBRARY

गन्धंकोळकर्पूरमिश्रकलशेनाचमनंददातिक्षीरकुशायेश्वास्तेर्यवतंडुळैसिद्धार्थैश्वास्तंद
दातिवैछवीमग्नुःसामाथर्वभिःस्तुवंतीमाआपःशिवतमाःएताःसोमयौततमामे
ध्यामेध्यतमाअमृताअमृतरसाःपाद्यार्घ्याचमनीयास्तासुखतांप्रतिगृह्णातुभगवान्महाविछुर्वि
छवेनमइतिमाळाम्बुभादिव्यासर्वगंधैरलंकृतापद्माब्रह्मपवित्रेणएताःसूर्यस्यरश्मिभिःप्रति
गृह्यतांप्रतिगृह्णातुभगवान्महाविछुर्विछवेनमइतिवनस्पतिरसौधूपोधूपाद्योधूपउत्तमः।
आघ्रेयःसर्वभूतानांधूपोयंप्रतिगृह्यतां।एताब्रह्मपवित्रेणएताःसूर्यस्यरश्मिभिः।प्रतिगृह्य
तांप्रतिगृह्णातुभगवान्महाविछुर्विछवेनमइतिज्योतिश्चक्रस्यतेज ‘श्चदेवानांसततंपि
यः।प्रभाकरःसर्वदेवानांदीपोयंप्रतिगृह्यतां।प्रतिगृह्णातुभगवान्महाविछु र्विछवेनम
इतिदादशानामग्निःपुष्पादिदद्यात्क्षीरेवतर्पणंकृत्वाकृशरंपायसंगुडोदनंहरिद्रोदनमितिहवी
ष्यविज्ञेतेवितततमितिपायसंनिवेदयेत्घृतंहुतेपूर्णगुडोदनंशरावंनिवेदयेत्।कृशरमा
ज्यमिश्रंजुहुयात्वासुदेवायस्वाहासंकर्षणायस्वाहानिरुद्धायस्वाहाप्रद्युम्नायस्वाहाअनिरुद्धस्वा

हासरस्वत्यैस्वाहाविश्वेदेवेभ्यस्वाहाविष्णवेनुकंतदस्यप्रियंपथोदितिरुरुगायस्यबाहवोजनयंतवीर्यं
वदंतिदाशानामधिरमुष्मैस्वाहेतिस्विष्टकृत्स्रुचंप्रतिसिंहमाधेनुवरप्रदानादथहविषांब
लिमुद्धरतित्वामेकमाद्यंपुरुषंपुराणंनारायणंविश्वसृजंयजामहेत्वमेवयज्ञोविहितोविधे
यस्तमात्मनात्मनिप्रतिगृह्यीष्वहव्यमित्यग्नेणाग्निमभ्यवहरतिपर्णेभुक्तशेषंनिदधातिरुद्रुवः
स्वरोमितिविश्वतुर्वाप्रदक्षिणंसहाग्निंप्रक्रमयतिविश्वभुजेनमःसर्वभुजेनमआत्मनेनमः
परमात्मनेनमइतिब्रह्मचारीगृहस्थोवाधादशब्राह्मणान्वसंयुक्ताःहरिद्रोदनंभोजयंतिसं
तिष्ठतेप्रतिष्ठाविधिःसंतिष्ठतेप्रतिष्ठाविधिः॥ ॥अथातोमहादेवस्याहरहःपरिचर्याविधिंव्या
ख्यास्यामःस्नात्वाशुचौसमेदेशेगोमयेनोपलिप्यप्रतिकृतिंकृत्वाहृतैःपुष्पैर्यथालाभमर्चयित्वा
सहपुष्पारकेनमहादेवमारोहयेत्ॐनमोभगवान्महादेवइतिअथयोरुद्रइतित्र्यंबकं
यजामहइतिवापात्रमभिमंत्रयेतप्रक्षाल्यत्रितिरःपवित्रमपानीयपुनरभिमंत्र्यसहपवित्रे
णादित्यंदर्शयेदोमित्यौमितीस्तासामितितस्मैत्र्यंबकमित्यासनयाद्याघ्यंचमनीयंदत्वाअथ

व्याहृतिभिर्मीलयंत्र्यपोहाथैनंस्नापयेत्यापोहिष्ठादिपवमानसूक्तेनइत्येतेनानुवाकेनब्रह्म
तज्ञानंकुडायवामदेवंयत्तुःपवित्रमित्येताभिर्मार्जयित्वाॐनमोभगवतेरुद्रायेतित्र्यंबक
मितिवस्त्रंयज्ञोपवीतंदद्यात्।कुडायत्वरितरुद्रवामदेवेमघोरस्यस्तपुरुषायेज्ञानस्त्र्यं
बकमित्येतैर्दद्यात्सोयज्ञोपवीतंदद्यात्अथत्वरितरुद्रकुडेनगंधपुष्पधूपदीपानिदद्यात्
रौद्रीतिश्वेतद्वीपंदेवस्यत्वेतिपंक्त्यमहादेवायहविर्निवेदयामीतिहविर्निवेदनम
मतोपस्तरणमसीतिकुशपदंकृत्वात्र्यंबकमितिपरिषेचनीयंविरुद्रंत्वाऽवरुक्षन्निष्पमुहूर्त्त
मवेक्ष्यमाणोमतापिधानमसीतिप्रतिपदंकृत्वात्र्यंबकमितिहिरण्मनीयानेनैवकार्यःसर्वो
पकरणैर्यथोपपदंसंपूज्यभवायदेवायनमइत्यग्नौरथंत्वरितरुद्रेणगंधपुष्पधूपदीपंद
दातिरौद्रीभिर्ऋग्यजुःसामाथर्वभिस्तुत्वंत्र्यंबकंयस्तोत्रैःप्रयातुभगवान्महादेवइतिविसर्जयति
प्रतिमास्थानेष्वावाहनोद्वासनंविसर्जनं॥ ॥अथातोमहापुरुषस्याहरहःपरिचर्याविधिंव्या
ख्यास्यामःशुचौसमेदेशेगोमयेनोपलिप्यप्रतिकृतिंकृत्वाहृतपुष्पैर्यथालाभमर्चयित्वासह

पुष्पादकेनमहापुरुषमावाहयेदोंव्याहृतीभिःपुरुषंमावाहयामीत्यावाह्यायातुभगवान्महा
पुरुषइतिकुशैरासनंदत्वासावित्र्यापात्रमभिमंत्र्यप्रक्षाल्यपुनरभिमंत्र्यसहपवित्रेणादि
त्यंदर्शयेत्ॐमित्यतमितोस्तासांत्रीणिपदाविचक्रमइतिपाद्यंदद्यादर्घ्याहृतीभिर्निमो
ल्यंव्यपोह्यार्घ्यंनंस्तापयत्यापोहिष्टादियवमानंसुवर्क्षनइत्येतेनानुवाकेनब्रह्मज्ञानंवाम
देव्यंयजुर्यजुःपवित्रेणेत्यथाङ्गैस्तर्पयतिकेशवंनारायणंमाधवंतर्पयामीत्यथव्याहृतीभिः
प्रदक्षिणमुदकंपरिषिंचेदंविष्णुर्विचक्रमइतिगंधादिदद्यातिशावतीधेनुमतीत्यक्षतंतद्वि
ष्णोःपरमंमणितिपुष्पंसावित्र्याधूपंतद्वीपंदेवस्यत्वेतिचरुंनैवेद्यंचमनीयंदद्यात्यथास्मैद्वादश
नामभिःपुष्पाणिदद्यात्त्रीणिपदाविचक्रमइतिप्रतियंदद्यात्समूहिकाभवंतुनइत्येतेनार्घ्यं
वैष्णवीभिऋग्यजुःसामाथर्वशिरस्कृत्वंतिव्याहृतीभिःपुरुषमुद्वासयामीतिप्रयातुभगवान्महा
पुरुषइतिप्रतिनिधिंप्रस्थानेघावाहनोद्वासनविसर्जनेवाहरहःस्वस्तयनंवेतिहस्माहबौधायनः॥
॥ ॥सूतकेमृतकेस्त्रीणांरजसोदर्शनेपिच।देवपूजानकर्त्तव्यामनसाप्रणतिंविना।अप्रतिषि

स्या २

तलिंगादिपूजाकरस्त्वीश्वरार्चनं। नित्यमाशौचमध्येनकारयेत्परहस्ततः।सुप्रतिष्ठितलिंगादिपू
जाकरस्त्वीश्वरार्चनं। सधर्मिहस्ततोनित्यंकारयेन्मतिमन्नरः।उक्ताभ्यांसूतकाद्यंतेकार्यंलुप्तंसु
रार्चनं।अन्यथाकुपितोस्यात्तांपार्वतीपरमेश्वरो।एकादशीप्रकरणेपुराणेमास्यसंज्ञके।कार्य
लुप्तंसूतकाद्यंतेत्वुक्तार्चायाःप्रकीर्त्तितं।सूतकांतेनरःस्नात्वापूजयित्वाजनार्दनं।दानंदत्त्वाविधाने
नव्रतस्यफलमश्नुते।स्त्रीणामुक्तंचतुर्थेऽह्निभर्तृभ्रूषणार्हता।स्मृत्यंतरेपंचमेऽहिदेवार्चायो
ग्यतेरिता।स्नाताभर्तुश्चतुर्थेऽह्निसुहास्यात्परिचारणे।पंचमेहनिभूहास्यादेवपिंड्यंचकर्मणि।
विधर्मिहस्ततस्त्वीशार्चांनस्वयंनाधिकारयेत्।स्वयंविधर्मीशार्चांनकुर्यादपिविचक्षणः।नित्यार्च
नविधिंवक्ष्येशिवस्यपरमात्मनः।वेदैकनिरताचार्यप्रसादेप्राप्यसादरात्।इष्टलिंगार्चनारंभेऽ
ष्टश्लोकपंचकं।ज्ञानेंद्रैस्त्रीयवहस्ताभ्यांमुखवस्त्रंनिवारयेत्।वेदांतवेद्याखिलविश्वमूर्त्तये
भविरूपाक्षविशोषभूम्यविश्वेश्वराशोषविशोषमूलकपाटमुद्घाटयकाळकाळ।पंचाक्षरीपा
रायकहृन्निवासपंपापुरीनाथपदाभिधान।पाशाभिधंपद्मजमुख्यबंधंकपाटमुद्घाटयकाळकाळ॥

अशेषमानातिगमारवैरिन्नशेषवेदांतसमन्वयार्थ।अनादिमायारचमचिंत्यरूपकपाट०।
आद्यंतमध्येजगदंतरात्मन्नखंडचित्सुखसंभृताद्यो।अनाद्यनिर्वाच्यतमोभिधानकपाट०।श
त्यागहीताद्भुतशारशंभोशशांकखंडोकितुंगमौळे।शंकोलसर्षपमात्ममोहंकपाट०इत्य
शुद्धिंप्रथमतःकृत्वाथशिवपूजकः।स्वयंध्यानन्यासतश्चशिवोभूत्वाशिवंयजेत्।इत्यशुद्धिमकृ
त्वैवशिवपूजांकरोतियः।तस्यपूजानिःफलैवसतुपूजाविडंबकः।आत्मस्नानइत्यलिंगमंत्रशु
द्धिंविधायतु।अथार्चयेन्महादेवमित्याद्यस्तांत्रिकाअपि।विलाप्यविकृतिंकृत्स्नांसंभवव्ययक्र
मात्।पंचाक्षरंवदन्विद्वानंदंचिंतयेन्मणं।अद्वयानंदचिन्मात्रविज्ञप्तिमिदंजगत्।इतिध्यायन्
स्वदेहादिसर्वंपश्येद्विशुद्धये।वर्षाषळंप्रपूर्यांतर्बहिश्चांबुयथावसेत्।घसाम्यंतर्बहिस्तद्व
गशापूर्यसर्वतः।सच्चित्सुखव्याप्तनिळानळाभ्रतेःसंशोधितलोषितसंघुतंजगत्।नोलेकतां
ब्रह्मणिशोधितास्विळास्वात्मानमात्मन्यमळात्मनायजेत्।सयत्कांमनेवस्वेष्टलिंगंसपीठकं।ध्या
यन्पश्येदियंवास्तलिंगंशुद्धंशिवप्रिया।शिवलिंगस्वस्यार्थज्ञानपूर्वकमेवहि।शिवेनमम्य

लिंगस्वस्यार्थज्ञानपूर्वंविलोकयेत्।स्वेष्टलिंगमथैषास्तलिंगशुद्धिरनुत्तमा।शिवलिंगस्वस्या
र्थःसूतेनोक्तःकृपाबळात्।स्वसंहितायांलिख्यंतेश्लोकाःकेचनतत्रगाः।शिवमेवस्वयंलिंगलिं
गंगमकंमेवहि।शिवेनगम्यतेसर्वंशिवेनान्येनगम्यते।शिवस्यलिंगंशिवलिंगमन्येमुनीश्च
शवेदविदोवदंति।स्वयंप्रकाशस्यनयुज्यतेयतस्ततश्चशंभुःस्वयमेवलिंगं।विवेकहीनचित्त
वृत्त्यपेक्षयामुनीश्वराःशिवस्यलिंगमित्ययंरवःसमस्तजंतुभिः।निगद्यतेस्वतःशिवःप्रसिद्ध
एवसर्वदातःशिवस्यलिंगमित्ययंरवःसमस्तजंतुभिः।निगद्यतेस्वतःशिवःप्रसिद्धएवसर्व
दातःशिवस्यलिंगमित्युरोरवोनसंगतः।तथाप्यशास्त्रानुसारेणाव्यक्तंलिंगमितीर्यते।तत्कार्यम
खिलंतद्व्यवहारेपृथक्पृथक्।सकार्यमथवाव्यक्तंसपीठंलिंगमुच्यते।स्वप्रकाशस्यापि
शंभोर्व्यवहारेणतत्वतः।शिवस्यलिंगंकथयंतिकेचिद्बहुप्रकारंव्यवहारदृष्या।नतत्वदृष्यापर
मेश्वरस्यस्वयंप्रभस्यास्तिनचास्तिलिंगं।यदस्तियन्नोस्तिमहेश्वरस्यसमस्तमेतत्स्ववदंतिलिं
गं।विशुद्धविद्याःपरयोगिनोस्यस्वयंप्रभस्येवनलिंगमूचुः।आळयंलिंगमित्याहुरपरेवेदवित्तमाः।

तदादिशंकरःसाक्षाल्लिंगंनान्यैर्मुनीश्वराः।आलयोनामचाधारःसर्वाधारःशिवःखलु।सरास
त्यस्वभावत्वात्सत्यएवशिवःखलु।अतःकल्पितरूपाणामाधारोभगवान्शिवः।अनाधारोम
हादेवःसत्यचैतन्यलक्षणः।संसारार्णवमग्नानामज्ञानांधीकृतात्मनां।चित्रपाकानुगुण्येनभु
वनार्थंद्विजोत्तमाः।अनाधारस्यदेवस्यशिवस्यपरमात्मनः।आधारोमंत्रसंस्कारात्कल्पितः
सत्यवद्बुधाः।लयनाल्लिंगमित्याहुरपरेवेदवित्तमाः।तदापिलिंगंभगवान्स्वयमेवमहेश्वरः।
लीयमानमिदंसर्वंब्रह्मण्येवहिलीयते।नलीयतेपरंब्रह्मसदासत्यस्वभावतः।लयोनास्ति
शिवस्येत्यप्यतेनोक्तमादरात्।तत्रस्थाःकेचनश्लोकाविलिख्यंतेत्रनोविदुः।ब्रह्मणोंतेमुनिः
श्रेष्ठामायायांलीयतेजगत्।तथाविष्णुश्चरुद्रश्चप्रकृतौविलयंगतौ।ब्रह्मणश्चतथाविष्णोस्तथा १०२
रुद्रस्यसुव्रताः।मूर्तयोविविधाःस्वेस्वेकारणेषुलयंययुः।मायाचप्रलयेकालेपरस्मिन्परमे
श्वरे।सत्यबोधसुखानंतेब्रह्मरुद्रादिसंज्ञिते।अभेदेनस्थितिंयातिहेतुस्तत्रसुदुर्गमः।अन्य
थाभानहेतुत्वादियंमायेतिकीर्त्तिता।आत्मतत्वतिरोधानात्मऽकल्प्यतेबुधैः।कार्यनिष्पत्तिहे
कार्यविघ्नकृताभावादयंकल्पमितिगीयते।।विधानाद्यत्नतोविधामोहस्तकारणवतः।सद्वैलक्षण्यद
ष्टेयमसदित्युच्यतेबुधैः।।१।।

तुल्याकारणंप्रोच्यतेबुधैः।एषामाहेश्वरीशक्तिर्नित्यतंत्रापरात्मवत्।अनयादेवदेवस्यशिव
स्यपरमात्मनः।उदितःपरमःकालोरुद्राःसर्वेजंतवः।सोपिसाक्षान्महादेवेकल्पितोमायया
सदा।कालेसर्वेपिलीयंतेनकालोलीयतेसदा।कालोमायाचतत्कार्यंशिवेनैवाहृतंबुधाः।
शिवःकालानवच्छिन्नकालतत्वंयथातथातथापिकालोसत्यत्वान्मायायासहलीयते।शिवोन
हिलयंयातिद्विजाःसत्यस्वभावतः।मूलाधारेपरोदेवितपश्यंतीनाभिमध्यमे।हृदयेमध्यमावा
त्वाद्यष्टस्थानेषुवैखरी।इतिवाग्भावनास्त्रंत्रंभवहूंमहत्रयापंचब्रह्मतयाभिन्नमथवा
सकलंजगत्।शिवाभिन्नात्मनाध्यातंविश्वहूंभवतिध्रुवं।यत्रवैश्वरचंडेयमर्थःसम्यक्प्रपं
चितः।तत्रध्यानस्यप्रकारोत्रवाक्यैःस्पष्टंप्रदर्श्यते।शब्दस्पर्शरूपरसगंधस्वरूपेज्ञानतत्पु
रुषाघोरवामदेवसद्योजाताख्यपंचब्रह्मात्मासत्यज्ञानानंतानंदलक्षणाःसांबःशिवोहमस्मि
सदाशिवेश्वररुद्रविष्णुब्रह्मस्वरूप॥ ॥आकाशवायुतेजोबन्धस्वरूप॥ ॥अनंतशिवानंतेश्व
श्वरुद्राग्निरुद्रनारायणवत्तुमुरवब्रह्मस्वरूप॥ ॥श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणस्वरूप॥ ॥

दिग्वाद्यादित्यवरुणपृथिवीस्वरूप॥ ॥पादपाणिवागुपस्थपायुस्वरूप॥ ॥त्रिविक्रमेंद्रउपेंद्रप्रजापतिमृत्युस्वरूप॥ ॥मनोबुद्ध्यहंकारचित्तांतःस्वरूप॥ ॥बृहस्पतिरुद्रमहादेवहिरण्यगर्भस्वरूप॥ ॥प्राणापानव्यानोदानसमानस्वरूप॥ ॥शिष्टविश्वदृष्टिविश्वयोन्यज्ञाक्षयास्वरूप॥ ॥शांत्यतीतशांतिविद्याप्रतिष्ठानिवृत्तिस्वरूप॥ स्पंदपरिस्पंदप्रक्रमपरिशीलनप्रचारस्वरूपाछादकबाधकमुग्धकतोदकभंजकस्वरूप॥ अवशिष्टाशेषपंचकस्वरूपेशानतत्पुरुषाघोरवामदेवसद्योजाताख्यपंचब्रह्मात्मास्तित्वज्ञानानंतानंदलक्षणाः॥ सांबःशिवोहमस्मि॥ ॥स्वसंहितायांस्तेनद्रव्यशुद्धिःप्रकीर्त्तिता॥ श्लोकाःकेचुनलिख्यंतेतन्मध्येचनसर्वशः॥ अथातःसंप्रवक्ष्यामिद्रव्यशुद्धिंसमासतः॥ श्रद्धयासहविप्रेंद्रशृणुतात्मविशुद्धये॥ आत्मानात्मेतिविप्रेंद्रद्विद्रव्यंव्यवस्थितं॥ आत्मद्रव्यंस्वयंशुद्धंसत्यज्ञानादिलक्षणं॥ सत्तामात्रेनदोषोस्तिस्वयंशुद्धायतःसदा॥ यदिसत्तासंबंधादुष्टस्यदुष्टतावेत्सदा॥ दुष्टसत्तासंबंधादुष्टस्यदुष्टतास्वतः॥ तथासतिविशुद्धंतुनसिद्ध्येवकिंचन॥ सत्ताहीनंतुतुच्छंस्यात्सत्ताशुद्धास्वतःसदा॥ ज्ञप्तिरूपं

हिविज्ञानंशुद्धमेवस्वतःसदा॥ अशुद्धिर्ज्ञेडरूपेहिदृष्टासर्वज्ञनैःस्वतः॥ स्वतःस्फुरणशून्यत्वात्ज्ञानंदुष्टमवेद्यदि॥ दुष्टमेवभवेत्सर्वंदुष्टस्फुरणसंगमात्॥ तथासतिविशुद्धंतुनसिद्ध्येवकिंचन॥ वस्तुस्फुरणशून्यंतुतुच्छमेवभवेत्सदा॥ दुष्टकारणविज्ञानेदोषोस्तीतिमतंयदि॥ अभिव्यंजकदृत्याहिज्ञानेदोषोनवस्वतः॥ अन्यथासकलंज्ञानंदुष्टमेवस्वतोभवेत्॥ अतःस्फुरणरूपंतुज्ञानंशुद्धंसदैवतु॥ आनंदस्तुस्वयंशुद्धःपुरुषैरर्थ्यतेयतः॥ अशुद्धःसर्वं[illegible]तावन्नार्थ्यतेथापुरुषैःस्वल्पु॥ ब्रह्मादिस्तंबपर्यंतैरर्थ्यतेहिसुखंसदा॥ विषयेंद्रियसंपर्काज्जन्यतेहिसुखंसदाहन्यतेचततोदुष्टमितिवेत्तन्नसंगतं॥ अभिव्यंजकदृत्याहिसुखेदोषोनवस्वतः॥ आत्मरूपंसुखंनित्यंनैवजन्मविनाशवत्॥ प्रेमालंबनतःस्वात्मासुखमेवनसंशयः॥ आत्मनश्चसुखत्वंतुप्रेमालंबनतःसदा॥ विद्यतेतत्ततोरेवंयत्तोस्तिसुखात्मनोः॥ अतश्चात्मतयानित्यंसुखंनदोषमेवहि॥ अतःसत्यचिदानंदाःस्वतःशुद्धानसंशयः॥ सत्यादिलक्षणंचात्मद्रव्यंशुद्धंततःस्वतः॥ अज्ञानोपाधिसंपर्कादशुद्धमितिचेन्नवै॥ विशुद्धिःपरमात्मस्याज्ञानादेवनकर्मणा॥

स्वतोवि भ्रहस्याज्ञानादभ्र हस्यात्मवस्कनः।अज्ञानस्यनिवृत्यैवभ्रहिंःस्वाभाविकीभवेत्।
कर्मणाभ्रहिंरुत्पन्नायदिसातत्स्वनश्यति।कर्मसाध्यमनित्यंहिननित्यंसंमतंहितत्।सच्चिदा
दरूपात्मानित्यभ्रहेश्वरःस्वतः।अज्ञानाज्जीवतातस्यनैवस्वाभाविकीसदा।अतोजीवेभ्रहिं
कत्वज्ञानादेवात्मवस्कनः।विभ्रहिंःपरमाप्रोक्ताकर्मणानकथंचन।अज्ञानेनाहतोजीवोव्य
वहारेतुकर्मणाविहीदितेनभ्रहिंःस्यात्ज्ञानाद्भ्रहिंःपरास्यतु।अनात्मरूपंयद्व्यमभ्रहंतत्स्व
भावतः।तथापिव्यवहारेतुविभ्रहिंरुक्तस्यकीर्त्तिता।आध्यात्मिकादिभेदेनद्विधानात्माव्यवस्थि
तः।देहेंद्रियाद्यहंबुद्धियात्मआध्यात्मिकंभवेत्।यथिव्यादिनिरूक्तानिभौतिकानितथैवच।शरी
रस्यशरीरस्यप्रोक्ताआधिभौतिकसंज्ञिताः।वेदोदिताश्चसंस्काराछिवभावनयापिच।तथाहिंसा
हिरण्याद्देहभ्रहिंर्दिजाभवेत्।इंद्रियाणामधिष्ठातृदेवतास्मरणादपि।शिवभावनयाचापि
विभ्रहिंर्द्विजपुंगवाः।प्राणायामादधिष्ठातृदेवतास्मरणादपि।शिवभावनयाभ्रहिंर्भवेत्प्राणस्य
सुव्रताः।प्राणायामाद्धिष्ठातृदेवतास्मरणादपिनिषिद्धचिंतनाभावाछिवभावनयापिच।

DR BHAU DAJI

मनआदेस्तविप्रेंद्राभवेद्भ्रहिंर्नसंशयः।समाधौविलयश्चापिविभ्रहिंःपरिकीर्त्तिता।ब्रह्मभाव
नयासर्वेविभ्रहमितिपश्यतः।सर्वेभ्रहंभवेदेवनात्रकार्याविचारणा।तथापिभ्रहिंःकर्त्तव्या
व्यवहारेखिलस्यतु।वेदसिद्धेनमार्गेणश्रेयःकामेननिष्ठितः।विलोक्यदेशकालादिद्रव्यंद्रव्य
प्रयोजनं।स्वापत्तिमवस्थांचेपुनःभ्रहिंसमाचरेत्।कल्याणेतीर्थसेवायांराष्ट्रहोसेवविघ्नमे।
सेवोत्सवेचदारिद्र्येस्यशीदोषानविद्यते।बहुनात्रकिमुक्तेनसर्वंब्रह्मात्मनापुनः।सर्वदोषनि
दृत्यर्थंचिंतयेत्सुदृढंसदा।ब्रह्मरूपेणसंयाम्यमेवसर्वंसदाभवेत्।नित्यभ्रहस्यदृष्टिस्तविभ्र
हंभवतिध्रुवं।नित्यभ्रहंहितब्रह्मसदासत्यादिलक्षणं।ततस्तदृष्टिसंयुक्तंविभ्रहंकेवलं
भवेत्।अथवासकळंकार्यंतर्कतश्चप्रमाणतः।कारणात्मतयापश्येत्सर्वदोषनिवृत्तये।का
र्याणांसर्वकार्याणांपरमात्मेतिनेतरत्।प्रवदंतिहिवेदांताःस्मृतयश्चादरेणतु।अतःसमस्तंपर
मभ्रह्मात्मनाविचिंतयेत्स्वानुभवेनमानवः।विचिंतनेनैवसमस्तमास्तिकाविभ्रहंतामेतिन
वात्रसंशयः।द्व्यभ्रहंविभायेवंशोवोहमितिभावयेत्।एवमभ्यासशीळस्यज्ञानमुत्पद्यतेचिरा

रात्। सुरव्यमर्चनमीशस्यज्ञानमेवाखिळात्मनः। सच्चित्सुखज्ञगन्मूळनित्यसर्वगताद्वयः।
महादेवोविकल्पोहमितिधीसाध्यहंमहः।सर्वस्यसाध्यहंसर्वमहंपूर्णशिवोस्म्यहं।इत्यादिद
ज्ञप्तिःशून्यमविकल्पमहंमहः।माहात्म्यज्ञानपूजायाःसूतःपौराणिकोत्तमः।कृपयैवोक्तवान
वसर्वज्ञश्चपराशरः।ज्ञानमेवशिवार्चनमिष्यतेस्कृष्टमेवबहिर्भजनंनृणां।वेदएवसतदामि
तिकारणंबोधएवपरमंपदमास्तिकाः।आस्तिकस्यापिरुद्रस्यप्रसादादेवसिद्धति।प्रसादस्थ्या
सापूजापविज्ञापापनाशिनी।परानंदप्रदापुंसांयोगिनांसार्वकालिकी।आवाहनविनिर्मुक्ताविसर्जनविवर्जिता।धूपदीपादिर्मुक्तायजतांयत्नवर्जिता।क्रियाकळापनिर्मुक्ताकर्तारहिताफळा।योगिनामात्मसंवेद्याविश्वविश्रांतिरूपिणी।विश्वस्योल्लासविश्रांतिविळासरसमोदतः। ७०५
महतांदेवतापूजासास्दायोगिनांखलु।प्रमातावप्रमाणंचप्रमेयंप्रमितिःपरा।देवतेतिपरि
ज्ञानंपरस्यपरमात्मनः।विळासोदेवदेवस्यविश्वमेतच्चराचरं।इतिज्ञानंपरापूजाशिवस्यम
हतीहिसा।योगिनामेवसापूजामहतीहिसुमंगळा।अयोगीतत्प्रसिद्ध्यर्थंकुर्यालिंगेशिवार्चनं।

तस्माद्ज्ञस्सर्वज्ञाचार्योक्तआम्नायमार्गतः। भस्मोद्धूळितसर्वांगस्त्रिपुंड्राळंकृताकृतिः।रुद्राक्ष
माळाभरणोनिगृहीतात्मेंद्रियः।उदङ्मुखःसुखासीनःस्वगुरुंमूर्ध्निचिंतयेत्।भक्त्यावनम्य
हस्ताभ्यांमुखवस्त्रंनिवार्यतु।एवंक्रमेनप्रकारेणद्रव्यशुद्धिंविधायच।ध्यानाद्भूमानंदरूपमहा
देवःस्वयंभवन्।मंत्राणीमयदेहःसन्वरणानासिसंज्ञकोस्नानेविमुक्तेध्यात्वात्रसांबमूर्त्तिवि
चिंतयेत्।मानसैरेवोपचारैरर्चयित्वाशिवंततः।महालिंगाभिधमहादेवदर्शनसिद्धये।गम
काधारसंस्कृतबाह्यलिंगेर्चयेच्छिवं।एतत्कस्योदभुखत्वेकारणंसंमतंहितत्।ज्ञानरत्नावळी
नाम्नि ग्रंथेविस्पष्टमीरितं।नप्राच्यामथतःशंभोर्नोत्तरेयोषिदाश्रयात्।नप्रतीच्यांयतःएष
दक्षंसमाश्रयेत्।वरलिंगस्थितेशास्यप्राङ्मुखत्वेनमीरितं।क्रियासारेततस्तत्रतस्यप्राग्वदने
र्चयेत्।२वरलिंगेर्चयेद्देवंएवीभिवदनंचुधः।स्थिरलिंगेयथाक्लृप्तंमुखमादौसमर्चयेत्।अ
दोषविहीनेनसारेणात्तयेणच।विशुद्धद्रव्यबंधेनकृत्वालिंगंमनोहरं।तल्लिंगंगुरुणादत्तं
भोगमोक्षैकसाधनं। विचित्रपीठेनिक्षिप्यविचित्रवस्त्रास्तृतेशुभे।तन्मध्येदेवदेवेशंसांबंध्यात्वा वे

सांबंध्यात्मार्चयेच्छिवं।ममनाथोमहादेवश्चित्यतेंतर्बहिर्यथा।तत्प्रकारस्तुसंक्षेपात्कथ्यते
त्रशिवाज्ञया।सांबंशुक्लंनीललंवंत्रिनेत्रंचंद्रशेखरं।वरदाभयकरंमूर्द्धलिंगस्थं संभजेशि
वं।विराड्हिरण्यगर्भाख्यकार्यपीठात्मकंतथा।हिकार्यवन्महामोहालिंगोत्थंकमगोचरं।त्रिवि
धार्थोकुलिंगाकीविराड्हिरण्यहात्मकंउमाग्रहीतवामांगंशुक्लंसोमार्द्धशेखरं।व्याघ्रचर्मांबरध
रंनीलग्रीवंत्रिलोचनं।वरदाभयहस्तंचविचित्रमुकुटोज्वलं।सर्वलक्षणासंयुक्तंसर्वाभर
णभूषितं।स्वस्वरूपानुसंधानप्रमोदात्तांडवप्रियं।त्रिमूर्त्तिभिःसदाध्येयंकैवल्योपनिषत्फल
तं।स्मरणादेवभक्तानांसंसारभयनाशनं।लिंगमूर्त्तिगतंव्याप्तंलिंगमूर्त्युपलक्षितं।विश्वादियो
गनामानंरुद्रशर्वादिसंज्ञकं।तुरगन्तिमित्तोपादानमज्ञानाश्रयगोचरं।प्रणवादिमहावाच्य १०६
महातात्पर्यगोचरं।सर्वोपनिषदामर्थंशास्त्रातीतंतुतत्वतः।स्वभक्तानांतत्वशुद्धिप्रदंरुद्रस्व
रूपतः।पितामहस्वरूपेणशांत्यादिगुणदायिनं।अतितीव्रंमुमुक्षुत्वदायिनंविष्णुरूपतः।कि ंच
श्वरस्वरूपेणदेशिकोत्तमलक्षणं।उत्पादकंमहारत्नेःपरशक्तिस्वरूपतः।रत्नेःस्वाभिव्यक्तयो

योग्यत्वप्रदंस्वस्वरूपतः।अभिव्यक्तंचकृपयासंतंरत्नोस्वयंप्रभं।मुक्तानांमोक्षदातारंएव
तःसर्वसिद्धिदं।सत्यकामादिकल्याणगुणरत्नगुणांबुधिं।वेदिकात्यंतसुलभंतांत्रिकात्यंत
दुर्लभं।देवतिर्यङ्नरात्मानंमोचकंमोचकप्रदं।सर्वोलयंसर्वलयंगमकंसर्ववस्तुनः।महा
लिंगंमहादेवंमहाभस्माभिधंधरं।स्वगतादिभिदाशून्यंसांबंसत्यादिलक्षणं।भजेशिवंतुर्य
तुर्यमात्मत्वेनसदामुदा।सर्वात्मकंसर्वदृशंसर्ववेदांतसंस्तुतं।सच्चिदानंदघनंसांबमू
र्त्तिंशिवंभजे ।यद्रासोल्लोकदृश्याशास्त्रदृश्यायदंशकः।यदात्मवज्ञानदृश्यातंभजेसांबमी
श्वरं।एकादशरुद्रादित्यादिसमस्तग्रहरूपिणं।सदाममानंदकरंसांबमूर्त्तिंशिवंभजे।विघ्न
भैरवदुर्गादिरूपेणाशेषसिद्धिदं।स्वस्वोचितविधानार्चावश्यंसांबंशिवंभजे।विघ्नेश्वरः क्षेत्र
पालोदुर्गाघोरासकुशा।देवाश्चान्येयदात्मानस्तंभजेसांबमीश्वरं।यद्रूपाःसर्वयोगिन्योयद्रू
पाःसर्वभैरवाः।तंनमामिमहादेवंसांबंसत्यादिलक्षणं।द्रव्यमंत्रक्रियाकालयुक्तयःसाधुसि
द्धिदाः।यन्मयत्वेनतंदेवंवंदेसांबंसदात्मकंशिवं।याज्ञवल्क्यादियोगींद्ररूपंरूपविवर्त्तितं।क

मापतिः१

पिलादिमहासिद्धरूपंसांबंशिवंभजे।यद्दामभागोमायस्यदक्षभागःपितामम।तंभजे
करंसांबंसच्चिद्रूपमसुखाकृतिं।सदादक्षिणहस्तेनसर्वानिष्टनिवारकं।वामहस्तेनसर्वेष
प्रदंसांबंशिवंभजे।विराड्रूपव्यक्तरूपंवानिर्वाच्याव्यक्तलिंगकं।सांबंभजेमहादेवंशिवंसत्या
दिलक्षणं।व्यक्तलिंगाव्यक्तलिंगात्मलिंगंस्वयंप्रभं।अनंतंसच्चिदानंदलक्षणंसंभजेशिवं।
सांबंयप्रासनासीनंशिवंमुक्तिविमुक्तिदं।गायत्रीचक्रमध्यस्थतारायस्तंसदाभजे।साशेषवाक्य
विच्छक्तिऊउशक्त्यात्मकंपरं।सच्चिद्रूपानंदरूपमविकल्पंशिवंभजे।एवंध्यात्वामहाशक्त्याशनैः
स्वोचितमंत्रतः।उपचारान्प्रकुर्वीतमहादेवस्यतुष्टये।आसनंचिंतनंचार्घ्यंपाद्यमर्चमनंतथा।
स्नानंवस्त्रंयोपवीतंभूषणानिवस्तुर्वशः।गंधःपुष्पंधूपदीपोसपानीयान्नतर्पणं।सकर्पूरंच
तांबूलंमाल्यंचाप्यनुलेपनं।नमस्कारस्तुतिश्चैषाह्येवंपूजाक्रमःशुभः।उपचाराःप्रदातव्याश्च
तुर्थैतैर्विशेषणैः।यैस्तन्यत्रप्रदृश्यंतेशिवप्रीतिकराएवते।शिवादिमुख्यनिधानायविघ्नादियो
गनिधानायजडाजडाशेषजगदेककारणायशिवलिंगानिर्वचनीयकेवलब्रह्मात्मैकत्वज्ञाना

मनोयाज्ञानाश्रयविषयायसांबायसांबमूर्तिधरायमोचकायमोचकप्रदायसच्चिदानंदस्वरू
पायप्रणवादिमहावाक्यमहातात्पर्यगोचरायशब्दबुद्धतीतायस्वयंप्रकाशायनित्यमुक्ताय
स्वगतसजातीयविजातीयभेदरहितायमहाभस्मनेमहालिंगायश्रीमहादेवाय॥ आस
नंसमर्पयामिएवमेतानिविशेषणानिसर्वेष्वप्युपचारेषुयोजनीयानिक्वयानोक्ते किमित्यत्रा
वाहनोद्वासनेवदंइतिचेदुच्यतेतत्रकारणंसर्वसंमतं।अप्रतिष्ठितशोळादिलिंगेचक्षणिकेत
थाआवहनोद्वासनेतुकर्तव्येशिवएजकैः।भ्रूमध्यालिंगपर्यंतंलिंगाद्भूमध्यमावधिआवहनो
द्वासनेतुकुर्यात्पूजांयदातदा।आवहनोद्वासनेस्तोलिंगेमंत्रैप्रतिष्ठिते।ऋष्यादिस्थापितेलिं
गेनावाहनविसर्जने।तत्रापिदेवदेवस्यसांबमूर्तेःशिवस्यतु।आभिमुख्यकृतेर्यातदावाह
नमितीर्यते।उद्वासनमितिप्रोक्तमाभिमुख्यविमोचनं।ईदृशावाहनोद्वासनेपिनैवोपपद्यते।
ऋष्यादिस्थापितेलिंगेरसलिंगेतुकिंपुनः।रसलिंगेमहादेवःसदासंन्निहितःस्वयं।तस्मात्तत्रा
वाहनादिवार्तोपिनहियुज्यते।शिवःसदासंन्निहितोरसमात्रेपिकेवले।समग्रेकिमुवक्तव्यं

रसलिंगे तुनिर्मले। शिवबीर्यं रसोनाम शिवचक्षोगमोक्षदः। कोवाजानाति माहात्म्यं रस
स्यैकं शिवं विना। रसार्णवे महेशेन ग्रंथेदेव्याएष महेश्वरः। अवतारं रसेंद्रस्य माहात्म्यं वक्तु वा
मुदा। देवीउवाच॥ अवतारं रसेंद्रस्य माहात्म्यं च सुरेश्वर। श्रोतुमिच्छामि देवेश वक्तु महसि
तत्त्वतः॥ ईश्वरउवाच॥ साधुपृष्टं महाभागे त्वया लोकहितं वचः। अनुग्रहकरं नृणां लोकानामु
पकारकं। त्वं माता सर्वभूतानां पिताचाहं सनातनः। द्वयोश्चैवरसोदेवि महामैथुनसंभवः।
स्वेतः शांभवं देवि पारदः कीर्तितोमया। पारदोगदितोयश्च परार्थसाधकोत्तमैः। सूतोयं मत्स
मोदेवि मम प्रत्यंगसंभवः। ममदेहरसोयस्माद्रसस्तेनायमुच्यते। दर्शनात्स्पर्शनात्तस्य सद्य
णात्स्मरणादपि। पूजनाच्च प्रदानाच्च दृश्यतेषद्विधंबलं। केदारादिनिलिंगानि पृथिव्यांकानि
यानिकानिचित्। तानिदृष्ट्वातुयत्पुण्यं तत्पुण्यं रसदर्शनात्। चंदनागरु कर्पूरकुंकुमांतर्गतो
रसः। मूर्छितःशिवएवायं शिवसान्निध्यसिद्धये। भक्षणात्स्मरमेशानिर्हतियापत्रयंरसः। ब्रु
ह्मविष्ण्वाद्यैः प्राप्यते त्स्मरमंपदं। ह्योमकर्णिकांतस्थं रसेंद्रं परमेश्वरं। स्मरन्विमुच्यतेपापैः

सद्योजन्मांतरार्जितैः। मूर्छितोहरतिव्याधीन्मृतोजीवयतिस्वयं। बद्धःखेचरतांधत्तेरसोवपु
श्चसैरवि। ज्ञानान्मोक्षःसुरेशानिज्ञानंपवनधारणात्। तद्वदेहस्थिरंदेविपिंडस्थैर्यंरसप्र
सादतः। ब्रह्महत्यादिपापौघनाशकोपीयोरसनिंदकः। नाहंत्रातास्मिवेत्रस्यजन्मकोटिशतैरपि। श्वा
नोयंजायतेदेवियावज्जन्मसहस्रकं। त्रिकोटिकल्पजन्मानि मार्जारोजायतेकृशः। रासभोल
क्षजन्मानिलक्षजन्मानिवायसः। जन्मलक्षंभवेत्तस्योयःपापीरसनिंदकः। जात्यंधोबधिरःकु
ष्ठीश्वित्रीलक्षजन्मनि। एवंदुःखसहस्राणिभुंक्तेऽसौरसनिंदकः। आलापंगात्रसंस्पर्शीयःकु
र्यादसनिंदकं। यावज्जन्मसहस्रंतुसंभवेद्दुःखपीडितः। रसेंद्रखंडमप्यत्रग्रंथेयेवंप्रपंचि
तेरसावरुद्धविशेषाणां माहात्म्यंकेवलस्यच। योमूर्छितंतस्यनिहंतिमूर्छांबध्नातियस्तस्य
वपाशबंधं। येपारयेत्प्रकरोत्यमर्त्यंकस्तेनुस्तेनसमःकृपालुः। व्याधिव्यूहसमूलपाटन
पटुर्दरिद्रविद्रावणोल्लोकद्दिष्टफलापरातपहरःपापौघसंतारकः। स्वेछाहारविहारसौख्य
दनोदिग्वाससिद्धिप्रदः श्रीशंभोःकरुणारसोरसवरःकस्तेनतुल्योभुवि। रसोरसइति

प्रोच्यते सर्वयातकैः। तन्मध्ये वेदनं वीक्ष्य मर्मं प्राप्नोति शर्मदैः। स्पर्शनं स्पर्शनं दानं धा
नंच परिरक्षणं। पंचधा रस एषोक्ता महापातकनाशिनी। यश्चनिंदति स्तुतं शंभोस्तेऽपि
रत्यरं। स पक्षेन्तरके घोरे यावत्कल्पविकल्पना। तन्मुक्तोजायते काकोदरिद्रो नामनिर्धनः
कृत्वा शुनश्च कंकोसश्वसेकश्चंडाल एवच। दरिद्रोऽभागः कुष्ठीसर्वेषामप्रियस्तथा। अष्टा
न्नपर्यंतं प्राहमंथानभैरवः। शंभोः समर्थंपरमंहितंजोदीर्घायुरारोग्यकरंसुपुण्यं। विधि
घोरंनरकंप्रयातिकल्पंहिकल्पंरवचुपापयोनिः। उदरेसंस्थितेसूतेयस्योक्तामतिजीवितं स
भुक्तोऽहृताघोरात्प्रयातिपरमंपदं। रसरत्नाकरेनित्यनाथोप्यंबाकृपाचितः। रसनाम्नानि
वनधारणरसवेज्ञवं। रसावस्थाविशेषाणांमाहात्म्यंचोक्तवान्मुदा। शिवबीजंसूतराजःपार
दश्वरसंडकः। एतानिरसनामानितथान्यानिशिवेयथा। दत्तेशिवपदंसिद्धंलोकानांमहो
त्तमं। शिवबीजंततःख्यातंसर्वसिद्धिप्रदायकं। यतःपरशिवात्सूतंतेनसूतंसदोदितं। संसार
स्यपरंपारंदत्तेसोपास्तःसूतः। रसीकरोतिलोहानिदेहान्यपिरसेवनात्। रसेंद्रस्तेनविख्या

तोऽवत्वाच्चरसःस्मृतः। दोषहीनोरसोब्रह्मामूर्छितस्तुजनार्दनः। मारितोरुद्ररूपोसौबद्धःसाक्षा
न्महेश्वरः। गोविंदभगवत्पूज्यपादाचार्यैर्महात्मभिः। अयुक्तंरसमाहात्म्यंभाष्यकृत्सूचितंध्रुवं।
मूर्छितोहरतिरुजंबंधनमनुभूयमुक्तिंदोभवतिअमरीकरोतिवपुतः कोन्यःकरुणाकरः सूता
त्सुरगुरुगोद्विजहिंसापापकलायोज्ञवंकिंवासाध्यंस्विंतदपिक्षिरामयतियत्तस्मात्कुप्र
वित्ततरः। इतिधनशरीरभोगान्मत्वानित्यांसदैवयतनीयं। मुक्तौसाक्षाज्ञानात्तदभ्यासात्सचस्थि
रदेहोपरमात्मनीवनियतंभवतिलयोयत्रसर्वसत्वानां। एकोसौरसराजःशरीरमजरामरंकु
रुतेगलितानल्पविकल्पःसर्वोघविवर्जितश्चिदानंदःस्फुरितोप्यस्फुरितंतनुंकरोतिकिंतुवै
र्ग्यस्यप्रज्ञयाज्ञेरितंकासश्वासादिदुःखविवर्जंच। योगंतन्वसमाधौप्रतिहतबुद्धींद्रियप्रस
रं बालःषोडशवर्षावधिपरसारवल्लंपटःपरतः। ज्ञातविवेकोहोमर्त्यःकथमानुयान्मुक्तिं त
स्माज्जीवन्मुक्तिंसमाहमानेनयोगिनाप्रथमंहि व्यातनुर्वेधेयाहरगौरीसृष्टिसंयोगात्यचा
रसराहरगौरीसृष्टिंतनुंप्राप्ताः। वंद्यास्तेरससिद्धामंत्रिगणाःकिंकरायेषां। आयतनं

विद्यानांमूलंधर्मार्थकाममोक्षाणांश्रेयःपरंकिमन्यत्स्वशरीरमजरामरंविहायैकंशिवोनाम
रसःसाक्षाद्रसोनामशिवःस्वयंनानयोर्भेदलेशोस्तिभिदांपश्यन्पतत्यधःरसोवैसइति
श्रुत्याप्यभेदःकथितोनयोःग्रंथांतरेपत्यातदभेदःसुसाधितः।यःस्यात्रावरणावमोचन
ज्ञियांसाध्यःप्रकृत्यापुनर्बंधनोसहतेनहीव्यतिपरंवैद्यानरेजायतिज्ञातोयद्यपरंनवेदय
त्तिचस्वस्मात्स्वयंद्योततेयोब्रह्मैवसदैन्यसंस्कृतिभयात्पायादसौपारदःरसमात्रस्यमाहात्म्ये
सत्येवंवागगोचरेरसनिर्मितलिंगस्यमाहात्म्यंकेनवर्ण्यते।शिवेनलोकरक्षार्थंनिर्मितंक
त्यषण्मुखं।रसलिंगस्यमाहात्म्यंकथितंकिरणागमे॥ ॥ईश्वरः॥शिवलिंगेस्थितामुक्तिःपुण्या
शिवसमप्रभा।तस्माद्रसमयंलिंगंसंस्थाप्यंतुप्रयत्नतः।सकृद्रसमयंलिंगंभक्त्यासंपूजयेद्य ११०
दिअनंतेशपदंगच्छेत्रश्रद्धावान्कोनभावयेत्।रसलिंगंतुसंपूज्यसर्वपापक्षयोभवेत्।वर्ष
णदुरितंहंतिनमस्कारेणदुर्भगात्।संपूज्यरसलिंगंतुप्राप्यतेपरमंपदं।सर्वान्कामान्वा
प्नोतिरसलिंगस्यपूजनात्।मानोन्मानप्रमाणानिनतस्यपरिकल्पयेत्।पूजयेद्रसलिंगंतुद्रव्य

६

हंयस्तुभक्तितः।सोणिमादिगुणैश्वर्यैर्मुक्तोयातिपरंपदं।दिंभाहतानांक्षपयारसलिंगंप्रपूज
येत्।दिंभाहताविमुच्यंतेयांतिमुक्तिं।परात्परां।तस्मात्प्रयत्नतःस्थाप्यंरसलिंगंशिरविधउ।
वावुछोक्तनविधिनारसबंधंतुकारयेत्।रसोपरसलोहादिरत्नगर्भंतुबंधयेत्।अथवाबा
छिनाशक्त्यावज्रलेपेनबंधयेत्।दिव्यौषधिरसौघेनमर्द्धयेद्बंधयेत्ततः।सिद्धयस्तत्रतिष्ठं
तिविघ्नसंघबहिष्कृताः।रसलिंगंतुसंस्थाप्यकोनयात्पतिवांछितं।अथवारससिद्धं तुमु
द्रिकांकारयेत्करे।तत्तद्दृश्यमाप्नोतियद्दातिजुहोतिवायेप्रदग्धानराःकेचिद्येपिपिंडवि
र्चर्तिताः।दिंभाहतास्तथान्येम्तायेगर्ह्यहेतुताःतन्मुद्रिकाकरेणैवदत्तंतेषुतिष्ठति।तस्मा
द्रसमयंलिंगंकर्त्तव्यंभक्तिमिछता।रसनिर्मितलिंगस्यमाहात्म्यंयदनुत्तमं।रसंद्रव्यामणा
ख्यग्रंथेप्येतत्समीरितं।विधायरसलिंगंयोभक्तियुक्तःसमर्चयेत्।त्रिगत्रितयलिंगानांसपू
ज्ञाफलमाप्नुयात्।रसलिंगस्यनिर्माणप्रकारेणसहादरात्।रसलिंगस्यमाहात्म्यंनित्यना
थेनवर्णितं।निष्कत्रयंहेमपत्रंरसंदनवनिष्कंअम्लेनमर्दयेद्यामंतेनलिंगंतुकारयेत्।

दोलायंत्रन्सारनाळेजंबीरस्वेदनंपचेत्।तल्लिंगंपूजयेत्तत्रसुश्भैरुपचारकैः।लिंगकोटि
सहस्रस्ययत्फलंसम्यगर्चनात्।तत्फलंकोटिगुणितंरसलिंगार्चनाद्भवेत्।ब्रह्महत्यासहस्रा
णिगोहत्याश्वयुतायुतं।तत्क्षणाद्विलयंयांतिरसलिंगस्यदर्शनात्।स्पर्शनात्सायतेमुक्तिरिति
सत्यंशिवोदितं।सल्लक्षणंपट्बंधप्रकारंचतथैवहि।तेनलिंगविधेयत्वंचोक्तवानत्रनेशिवः।
श्वेतंपीतंगुरुतथामधुसिक्थकसंन्निभं।अग्निमध्येयदातिष्ठेत्पट्बंधस्यल्क्षणंनिशाचरी
फलान्निर्यासंपातालयंत्रकेतेनतैलेनदेवेशिरसंसंकोचयेद्बुधः।तत्क्षणाज्जायतेदिव्य
दृढंधोमहारसः।कंटकंकंकणंकार्यरसलिंगंवरानने।मानोन्मानप्रमाणादिनतस्यपरि
कल्पयेत्।इतिस्कंदायेश्वरेणप्रोक्त्वाकिरणागमे।पंचसूत्राद्यपेक्षास्मिन्रसलिंगेनविद्यते। ११२
तस्माद्रसमयंलिंगंलिंगानामुत्तमोत्तमं।रसलिंगेतराशेषलिंगाधिक्यविवक्षया।पूर्वोध्याय
स्वयंभूतलिंगानुत्तमंतेरिता।स्वयमेवसमुद्भूतस्थापितस्यान्यथाकथं।शिववीर्यसमुद्भूतलिं
गसाम्यंयशोवद।स्वयंभुलिंगउत्कृष्टरसलिंगमितीश्वरः।स्वयमेवोक्तवान्देव्यैरसपूर्वमहो

दधौ।स्वयंभुलिंगसाहस्रेयत्फलंसम्यगर्चनात्।तत्फलंकोटिगुणितंरसलिंगार्चनाद्भवेत्।रस
लिंगेत्रोक्तरीत्यावाहनोद्वासनेनचेत्।त्वयैवाग्नेदाहृतेशुकिरणागमेशुतु।वचनेशुप्रतिष्ठोक्ता
शिवेनैवहिसादरं।ऋषिःसंस्थापनरवेस्तस्याःकागतिरुच्यतां।इतिवेत्तत्रदेवस्यप्रतिष्ठानविव
क्षिता।लिंगात्मनास्ववीर्यस्यस्थापनंहिविवक्षितं।तस्मात्प्रयत्नतःस्थाप्यंशिवेघत्र।रसलिंगं रसलिंग ४
नुसंस्थाप्यकोनयात्यशिवांछितं।इत्येतद्वाक्ययोर्मध्येसार्धश्लोकद्वयेनतु।समाहात्म्यंस्तबं
धप्रकाराणांतुवर्णनं।कथंवायुज्यतेलिंगप्रतिष्ठावेदवर्जिता।स्वयंथेनित्यनाथोपिसर्वज्ञः
शिवयोर्मुदा।रसलिंगस्थयोरेवमूर्त्योश्चिंत्यत्वमुक्तवान्।रसलिंगेस्वेष्टमूर्त्तेश्चिंत्यलोक्तिर्नयु
ज्यते।देशातरादावाद्यत्रप्रतिष्ठावेदवर्जिता।अष्टदशभुजंशुभ्रंपंचवक्त्रंत्रिलोचनं।प्रेतारू
ढंनीलकंठंरसलिंगेविचिंतयेत्।तस्योत्संगेमहादेवीमेकवक्त्रांचतुर्भुजां।अक्षमालांकुशं
दक्षेवामेपाशाभयंशुभं।दधंतींतप्तहेमाभांपीतवस्त्रांविभावयेत्।तत्रयत्नंविरचेत्सम्यक्तै
र्दुष्टैर्यथैःशुभैः।तत्रादौलिखेद्वृत्तप्रमाणंचतुरस्रकं।चतुर्द्वारयुतंतस्यमध्येषट्कोणमंड

ळं। तस्य बाह्येष्टकोणं वृत्तं तद्व्यष्टदळं बुधैः। रसलिंगं यजेत्रस्मिन्यंत्रे गंधादिपूजिते। सप्तविंशतिनिष्केतु द्रावितेकनकोत्तमे। नवनिष्कंस्तरार्द्धं विन्यसेत्रैकमानसः। मध्येष्टकृते यंत्रे लिंगाकारेसुलक्षणे। द्रावितं हेम संस्तेद्यं प्रतप्तेपरिदाळयेत्। मुहूर्त्तेस्वांगशीतंतं रसलिंगंयथोचितं। स्थापयेत्पुनरादाय घृतसिक्तं मदंहरेत्। एवमेवैतरैर्लिंगैरभ्रसत्वादिभिःप्रिये। रसलिंगंप्रकुर्वीत यद्वाविन्नानुसारतः। लिंगंतु द्विविधंप्रोक्तं सकळंनिष्कळंप्रिये। पूर्वोक्तंसकळं लिंगं निष्कळंकेवळोरसः। सर्वेषामपिलिंगानांसमंपूजाफळंभवेत्। बुभुक्षूणांहिसकळंनिष्कळंमोक्षमिच्छतां। प्राणप्रतिष्ठांलिंगस्यकुर्वीतैकाग्यमानसः। स्रणिंमायांवपाशंचहंसःसोहंनितिप्रिये। अमुष्यलिंगस्यप्राणाइहप्राणाअमुष्यलिंगस्यजीवइहस्थितः। अमुष्यलिंगस्यसर्वेंद्रियाणिअमुष्यलिंगस्यवाङ्मनश्चक्षुःश्रोत्रघ्राणाइहागत्यसुखंचिरंतिष्ठंतुस्वाहंसः स्वाहा। यरलवशषसहोंक्रोंक्रौंओंअस्यमंत्रस्यब्रह्मविष्णुमहेश्वराऋषयःऋग्यजुःसामानिछंदांसि परादेवताःआंबीजंस्वाहेतिशक्तिः प्राणप्रतिष्ठायांविनियोगः। मंत्रेणानेनलिंगस्यप्राणस्था

यनमाचरेत्। इत्येवंशंभुनादेवैस्पष्टंसिद्धांतशासने। रसलिंगार्चनायोग्ययंत्रोद्धारेणसंयुता। रसलिंगस्यनिर्माणप्रकारेणचसंयुता। प्राणप्रतिष्ठामंत्रेणतद्ध्यानैश्चसंयुता। प्राणप्रतिष्ठाकथितारसलिंगस्यसादरं। तस्मात्त्वंशिवलिंगस्यवाक्यस्यगतिमेकांवदेतिचेत्। यंत्रंतुतांत्रिकैर्ग्राह्यंरसाद्यासादनायहि। रसलिंगस्यनिर्माणप्रकारश्चिष्टमेवनः। स्वयंप्रतिष्ठितस्यापिपुंशरीरस्यसर्वदा। प्राणप्रतिष्ठातंत्रोक्तामूढान्प्रतियथातथा। रसस्यरसलिंगस्यमाहात्म्यमविज्ञानतः। प्राणप्रतिष्ठातिश्चह्यपिशाचीपरिमोहितान्। नरान्प्रतिशिवेनोक्ताप्रतिष्ठानबुधान्प्रति। प्रतिष्ठानेष्यतेतज्ज्ञैःपुंदेहरसलिंगयोः। अनवस्थाभयादेवसामूर्त्तेविषयात्ततः। अथबाळोहमिश्रत्वाऽर्कसिद्धांतशास्त्रोक्तप्रतिष्ठातदभावेनसाचनोक्तारसार्णवारसरत्नाकरेळोहमिश्रत्वेपिनसेरितारसाधिक्यात्केवळेसारसलिंगेकथंभवेत्। बाणलिंगस्यैवशास्त्रेप्रतिष्ठायाश्चकीरितात्। स्वयंभुदिव्यार्षाणांतुलिंगानांसापिनैवहि। तिभ्योप्युत्कृष्टरसलिंगस्यसायुज्यतेकथं। स्वयंभुदिव्यार्षलिंगप्रतिष्ठायानिषेधकं। वायवीयपुराणस्थंवाक्यंपूर्वमुदाहृतं। स्वयंभुलिंगमुत्कृ

ष्टरसलिंगमनुत्तमं। इत्यप्यत्र रसाद्भिरुद्धशिववाक्यमुदाहृतं। अनुत्तमस्यरसलिंगस्यसाक्षाद्भि
वात्मनः। पार्थिक्यपिप्रतिष्ठातो विदुषांनैवसंमता। शिववाक्यस्यतात्पर्यमेवमेवनचेन्नदा। सि
द्धांतशासनरवार्णसार्णवरुद्रशिववाक्ययोः। मिथोविरोधादीशस्यात्रामकत्वंप्रवेत्स्यलु। रसव
द्भूपायविदांविरळत्वाद्धिवेनतु। केवलस्यरसस्यैवप्रोक्तानिष्कळलिंगता। मुक्तिदंनिष्कळंलिं
गंसकळंभुक्तिमुक्तिदं। तस्माज्जीवन्मुक्तिकामैःकामःसकळंलिंगमर्चयेत्। शिवयोर्नित्यनाथोक्ते
मूर्तिनोक्तेत्वयाकथं। इतिचेन्नस्यतेष्टिसांबमूर्तिर्हिमेमता। अथवारससिद्ध्यर्थंतेमूर्तिस्तेनव
र्णिते। मयात्रसर्वसिद्ध्यर्थंसांबमूर्तिरुक्तवर्णिता। प्रेतारूढस्वादिमूर्तिस्तंत्रोक्तानक्रतीरिता। कैव
ल्योपनिषदोक्तासांबमूर्तिर्नतंत्रगा। किमत्रबहुनोक्तेनरसलिंगमनुत्तमं। रसलिंगसमंलिं ११२
गंनैवकुत्रापिकिंचन। तस्माद्रसमयेलिंगेनावाहनविसर्जने। आत्मिमुख्यादिकरणंवास्मि
न्लिंगेनविद्यतेनुपासकमनःपाकानुरूपानंतक्रियं। रसाभिन्नंमहादेवंसांबमूर्तिंपरात्प
रं। अनुग्रहैकनिरतंसर्वदाभिमुखंस्वयं। चिंतयन्रसलिंगेतुपूजयेदुक्तमार्गतः। नित्यावनवि

धिःप्रोक्तःसंग्रहेणमयादरात्। अशेषेणैवतंवक्तुंकःसमर्थःशिवंविना। सर्वशास्त्ररहस्यज्ञः
सर्वप्राणिहितेरतः। संग्रहेणोक्तवान्पूजाविधानंश्रीपराशरः। एककालंद्विकालंवात्रिका
लमथवानरः। लिंगेदिनेदिनेदेवंपूजयेदादरेणतु। आसनावाहनेवार्घ्यपाद्यमाचमनंतथा
स्नानंवासोपवीतंचभूषणानिचसर्वशः। गंधंपुष्पंतथाधूपंदीपमन्नेनतर्पणं। माल्यानुलेपने
त्रेवनमस्कारोविसर्जने। एषपूजाक्रमःप्रोक्तःसमासेनमयातव। विस्तरेणमयावक्तुंनशक्यं
कल्पकोटिभिः। प्रणवेनैवमंत्रेणसर्वंकुर्यादतंद्रितः। प्रणवःसर्वमंत्राणांखल्वेकंदंसनातनं।
श्रीमत्पंचाक्षरेणैवसतारेणाथवामुना। पूजयेद्देवदेवेशंलिंगेसिद्ध्यर्थंसिद्धये। वैयंबकेनमं
त्रेणश्रौतैरन्यैरथापिवा। लिंगेदिनेदिनेदेवंपूजयेदादरेणतु। जन्मनाब्राह्मणादीनामाश्रमाणां
तथैवच। प्राधान्येनमहादेवःपूज्योनानासिसिद्धये। तस्मात्सर्वैःपूज्यःसनात
नः। पितामहोपिसर्वोत्तमतदर्थंपूज्यएवहि। देवताउत्तमाःसर्वेमध्यमाअधमाअपि। तदर्थं
पूजनीयाश्चसर्वज्ञात्याश्चेतरेपि। सर्वमूर्तिःस्वयंसाक्षीसांबःसत्यादिलक्षणः। लक्ष्यस्तुतःस्थितः

साक्षात्तदधानमिदंजगत्।शिवदृष्टिस्तुसर्वेचकर्तव्यासर्वेजंतुभिः।राजवुद्ध्यैथामात्यै
यतेसर्वेजंतुभिः।राजाधिराजःसर्वेषांच्यंबकस्त्रिपुरांतकः।तस्यैवानुचराःसर्वेब्रह्मविष्ण
दयःसुराविहायसांबमीशानंयेऽन्ये देवांतरंतेमहाघोरसंसारेपतंतिपरिमोहिताः।म
हादेवस्यसांबस्यशिवस्यैवकेवलं।देवताःसकलाध्येयाःसुविज्ञेयामनीषिभिः।सर्वमन्यत्प
रित्यज्यशिवएकःशिवंकरः।ध्येयइत्याहपरमाश्रुतिरथर्वणिस्वयं।श्रौतस्मार्तैसमाचारैर्ब्रा
ह्मणैःपरमेश्वरं।महाब्राह्मणमीशानमुपगच्छेत्सदेवतं।तच्छिष्यत्वेनविधादिदेवान्यास्तिको
त्तम।उपगच्छेत्सदाविप्रोनप्रधानतयासदा।स्वसंहितायांसूतोपिकृपयारोमहर्षणः।संग्रह
णोक्तवान्एतांविधिंदेवस्यशूलिनः।वक्ष्येएतांविधिंप्रोक्तांश्रृण्वंतुमुनिपुंगवाः।श्रुतिस्मृत्या
दिकंकर्मकृत्वाश्रद्धापुरःसरं।स्नात्वाशुद्धेसमेदेशेगोमयेनोपलेपिते।आसीनःसर्वदामौनी
निश्चलोदभुखःसुधीः।विचित्रमासनंतत्रनिधायब्रह्मविष्णुमाःआगस्त्यनेवशास्त्रेणप्रोक्तेन
कृणलक्षितं।आदायशुद्धयाविप्राशिवलिंगंसमाहिताः।तत्रैवावाह्यदेवेशंप्रणवेनहृदिस्थि

विप्राः ४ भुक्तिमुक्तिदं ४

तं।अर्घ्यंदत्वामुनिश्रेष्ठास्ततःपूर्वोक्तमंत्रतः।पाद्यमाचमनंचैवदत्वापूर्वोक्तमंत्रतः।स्नापयित्वा
महादेवमापोहिष्ठादिभिस्त्रिभिः।तथापुरुषसूक्तेनश्यामत्र्यंबाहरेणच।पुनराचमनंदत्वा
प्रतिष्ठाप्यासनेहरं।दत्वावस्त्रंमुनिश्रेष्ठाःप्रणवेनसमाहितः।उपवीतंपुनर्दत्वारुद्रेणो
नवसादरं।गंधंपुष्पंतथाधूपंदीपंचैवादरेणच।श्यामत्र्यंबाहरेणैवप्रणवेनयुतेनच।हृ
दिनिवेद्यदेवायपानीयेनसहादरात्।पुनराचमनंदत्वातांबूलंसोपदंशकं।माल्यंदत्वानुत्ते
पंचप्रणम्यभुविदंडवत्।लौकिकैर्वैदिकैःस्तोत्रैःस्तुत्वाहृदिविसर्जयेत्।प्रणवेनमहादेवंस
र्वेशंसर्वकारणं।ब्रह्मचारीगृहस्थश्चवानप्रस्थश्चसुव्रत।एवंदिनेदिनेदेवंपूजयेदंबिकापतिं
।सन्यासीदेवदेवेशंप्रणवेनैवपूजयेत्।नमोंतेनशिवेनेवस्त्रीणांपूजाविधीयते।विरक्ता
नांतुशूद्राणांमेवंपूजाप्रकीर्तिता।अन्येषामेवसर्वेषांनराणांमुनिपुंगवाः।पूजादेवाबळंयद्
ध्रुवप्रणामस्तस्यकीर्तितः।यांयांमूर्त्तिसमाश्रित्यब्रह्मभावनयाजनाः।आराधयंतिदेवेशंक्रमा
त्कल्याणंतिशंकरं।रुद्रस्यमूर्त्तिमाश्रित्यप्रसादात्क्रमवर्तिनाः।अयत्नेनैवतानंतिशिवंसर्वत्रसं।

सर्वासु

स्थितं रुद्रमूर्त्तिषु शिवोत्तीवप्रकाशते। अन्यासुतारतम्येनशिवः साक्षात्प्रकाशते। आदर्शनि
र्मलेयद्वन्मुखंभातिस्पशंबुधाः। तथातीवमहादेवोभातिश्लाघ्यासुमूर्त्तिषु। सर्वमूर्त्तिषुमाबुद्धा
ह्यहूयापरयासह। यजपास्तेमहाविष्णोमूर्त्तिश्चहिक्रमेणवै। चित्तपाकानुगुण्येनहरेश्चैवक्र
मेणतु। अवाप्यपरमांमु...र्त्तिंममसर्वोत्तमांनरः। लब्ध्वामन्त्रंशिवज्ञानंतेनयातिपरांगतिं। हरि
ब्रह्मादिदेवान्ये पूजयंतियथाबलं। अचिरान्नपरप्राप्तिस्तेषामस्तिक्रमेणहि। रुद्रंये वेदविछ्
ज्ञाः पूजयंतियथाबलं। तेषामस्तिपरप्राप्तिरचिरान्नक्रमेणतु। रुद्रोविष्णुः प्रजानाथःस्वराट्स
म्राट्पुरंदरः। परतत्त्वमितिज्ञानंनराणांमुक्तिकारणं। अमात्सराडबुद्धिस्तुनदोषायफलायहि।
तस्माद्भक्त्यमतिर्मुख्यासर्वत्रनहिसंशयः। तथापिरुद्रेविप्रेंद्रापरतत्त्वमतिर्भृशं। वरिष्ठनतथा
न्यत्रपरस्फूर्त्यन्यताबलात्। संग्रहेणैवकोर्मश्चविष्णुनाकूर्मरूपिणा। अनेकपूजैकफलाविधा
नंकथयेरितं। स्वैमंत्रैरर्चयेद्देवंपुष्पैःपत्रैस्तथांबुभिः। ब्रह्माणंशंकरंसूर्यंतथैवमधुसूद
नं। अन्यांश्चाभिमतान्देवान्भक्त्याचाराधयेन्नरः। प्रदद्याद्धूपपुष्पाणिस्तुतेनपुरुषेणतु। आ

यावैदेवताःसर्वास्तेनसम्यक्समर्चितं। ध्यात्वाप्रणवपूर्वंवैदेवतानिसमाहितः। नमस्कारेण
पुष्पाणिविन्यसेद्यथाक्रमं। नविष्णाराधनात्पुण्यंविद्यतेकर्मवैदिकं। तस्मादनादिमध्यांतं
नित्यमाराधयेद्धरिं। तद्विष्णोरितिमंत्रेणसूक्तेनपुरुषेणतु। नैताभ्यांसदृशोमंत्रोवेदेसूक्तंचतु
र्थिकं। ज्ञात्वेदंयोतत्त्वात्मानंविष्णावमिततेजसि। तदात्मातन्मनःशांतस्तद्विष्णोरितिमंत्रतः। अ
थवादेवमीशानंभगवंतंसनातनं। आराधयेन्महादेवंभावपूतोमहेश्वरं। प्रणवेनरुद्रगायत्र्या
प्रणवेनाथवापुनः। ईशानमथचारुद्रैर्त्र्यंबकेणसमाहितः। पुष्पैःपत्रैरथाङ्गैर्वंदनाद्यै
र्महेश्वरं। तथोंनमःशिवायेतिमंत्रेणानेनवायजेत्। नमस्कुर्यान्महादेवममतंसत्यमीश्वरं। नि
वेदयेत्तत्त्वात्मानंयोगाद्भक्त्यणधीश्वरे। यास्सर्वशास्त्रसारार्थस्तांदेशंकरसंहिता। तस्यांस्कंदाय
देवर्षेर्विधानंसमीरितं। श्रीमत्संवाचरणेवगायत्र्याशौवयाततः। स्नायाद्विशुद्धभावेननरः
संकल्पपूर्वकं। अरात्रुःकंवमात्रंवाकटिमात्रमथापिवा। प्रातःस्नानेत्वशक्तश्चेन्मध्याह्नेस्ना
नमाचरेत्। ततःशिवार्चनागारंशुद्धांतःकरणःपुमान्। प्रविश्योपविशेत्तत्रस्वयंप्रीत्योत्तराननः।

भस्मपात्रंविनिक्षिप्यजलपात्रंषडानन।ध्यायेद्धेनुंजलाध्यक्षमोमापःसर्वमित्यतः।शंकरंपु
स्मनितथाश्मर्त्यवाङ्मरेणतु।भस्मस्नानंततःकुर्याज्जन्मनिघ्नये।अग्निरित्यादिभिर्मंत्रैः
सद्योजातादिमंत्रतः।सर्वांगोद्धूळनंकुर्यादापादतळमस्तकं।मळनिर्मोचनंत्वेतज्जळस्नानं
षडानन।भस्मस्नानंतुसंसारतापविध्वंसकारणं।त्रिपुंड्रंधारयेत्पश्चाद्भस्मनासहितेनच।
त्रिपुंड्रधारणंकृत्वाततोरुद्राक्षधारणं।कुर्याद्युक्तप्रकारेणतत्तत्स्थानेसमाहितः।जळपुष्पाक्षता
न्निरुद्धाड्यानिशोधयेत्।शिवाहोप्यतिरम्याणिपवित्राणिषडानन।ततोरुद्रमयीकुर्यान्न
चुरुद्रार्चनापरः।अरुद्रःरुद्रयन्रुद्रंनरुद्राफळभाग्भवेत्।रुद्रोभूत्वायजेद्रुद्रंअर्चयेत्सतुरु
द्रवित्।शरीरेचत्रिकरणान्न्यधेत्तिष्ठेत्तिदेवताः।अभ्यंतराणिबाह्यानिदत्तोनाद्यपभोगतः।अ
र्पितानिभवेत्येवड्यानिशिवेवाहन।अर्पितान्यर्पयेद्योसौरौरवंनरकंव्रजेत्।तद्दोषपरि
हारायशारीरंदेवतामयीं।भूतेंद्रियादिसंयुक्तंध्यायेद्रुद्रात्मकंनरः।ततःसमाहितमनाःशंक
रध्यानतत्परः।पाद्याद्याचमनस्नानंपुनराचमनंसह।वस्त्रंयज्ञोपवीतंचभूषणंगंधमक्षतान्।

११६

ततो४

पुष्पाणिशिवयोग्यानिपूजाणिविविधानिच।धूपंदीपंघृतयुतमुपहारंषडानन।भक्ष्यभोज्या
न्नपानादिप्रशस्तद्रव्यसंयुतं।दद्याच्छिवायतांबूलंकर्पूराद्यपदंशकं।घृताक्तवर्तियुक्तानि
शालिपिष्टकृतानिच।नीराजनानिरम्याणिदद्यादेकाग्रमानसः।श्रीमत्पंचाक्षरेणैवमंत्रेण
शिवेवाहन।पुष्पांजलिंदद्याद्देवमंत्रेस्त्रिरुक्षिते।लौकिकैर्वैदिकैःस्तोत्रैःशिवंस्तुत्वेतशक्ति
तःनेत्रेतरुद्रावेळायांनरंवत्सबहिःकृतं।शिवस्यद्रोहिणावारंनिंदकंनहृदिस्मरेत्।शिवा
शिवागमेशैवधर्मेशिवपरिग्रहेलिंगमेप्राणलिंगैक्येशिवलिंगार्चनेगुरौ।शिवस्थानेषुस
र्वेषुवाराणस्यादिकेषुच।विपरीतास्तुवेदुर्हियस्यस्यात्सबहिःकृतः।दधाविनागौतमेनयज्ञा
द्याब्राह्मणाधमाः।कळावत्तरिष्यंतिनिंदकास्तेबहिर्नराः।राक्षसाःक्रूरकर्माणःपापाचारस
मन्विताः।कळावत्तरिष्यंतिनिंदकाब्रह्महत्यासुरापानस्वर्णस्तेयकृतःपुरा।बहिर्नराःवि
ष्यंतिकळावीश्वरनिंदकाः।नतैस्सहभाषेतनसहासीतवासनेतेषांपंक्तौनभुंजीतनतैः
कुर्यात्तबंधुतां।प्रमादाद्वैनाकाळेपश्येद्यदिबहिर्नरं।प्रायश्चित्तेनमहताशुद्धिमाप्नोतिमान

वः।एतेषां दर्शनेप्रायश्चित्तमशेषतरंशृणु।श्रीमत्पंचाक्षरंमंत्रंजपेत्ध्यात्वाशिवंनरः।सेवकान्याचकांश्चोपकरणद्रव्यशोधकान्।शिवभक्तांश्चकुर्वीतभस्मरुद्राक्षधारिणः।एवंलिंगार्चनंकृत्वाप्रातःकालेविशुद्धधीः।वृत्त्यर्थमाऽऽयेदर्थंसर्वदोषविवर्जितं।ततोमध्याह्नसमयेकुर्वीतेवंशिवार्चनं।समागतंपुण्यबलात्ततोतिथिंसमर्चयेदीश्वरवत्सानरः।ऽऽलस्यानाद्यंध्यवनेऽनानाविधैस्तथान्नपानैःप्रियवाग्भिरादरात्।विनामहेश्वरैरेकोयस्तुंक्तेषऽऽननः।सपापीयानघंक्तुंक्तेसश्रीकंगपराधकृत्।अतोमाहेश्वरान्भक्तान्सोऽऽसयित्वाविधानतः।पश्चाद्भुंऽऽक्तेतत्साकंवैमित्रबंधुऽऽनैर्नरः।ततोहस्तौपादौप्रक्षाल्याचम्यशुद्धधीः।वत्सरऽऽजवदासीतसुखमासनमास्थितः।पुराणवेदांतशिवागमेषुविचारयेत्त्वमनंतरूपं।सदाशिवाख्यंविमलंविदंशंपरात्परंसत्यचिदात्मकंतं।ततःसायंतनेकाळेयथावद्वरेन्नरः।दिनेदिनेमहाभागकुर्यादेवंसमाहितः।इदमखिळरहस्यंलिंगपऽऽणिविधानंसुऽऽननसुरमुनींद्रैरादृतंभक्तिमद्भिः।भवभयपरिहारंवेदवेदांतसारंत्वमपिकथयसर्वंलिंगपऽऽजातायकिंबहुक्त्याखिळंदेवाःपू

ज्याएवश्रुतीरिताः।शिवरोषतयानित्यंमंदबुद्ध्याधिकारिणः।मुख्याधिकारिणःपंचशिवएवशिवंकराः।शिवार्चयार्चिताःसर्वेदेवानेवात्रसंशयः।इत्थंस्मरऽऽसकेनशास्त्रापुष्पंतिवेयथा।शिवार्चनेनदेवाश्चतथातत्तद्भवंदिशेत्।तिहिपथकदेवेनवासाहंदेवंदेवमनोहरं।पऽऽजयेत्परयाभक्त्यातांविनान्यशिवार्चनं।वैदिकत्वाभिमानांधाःशुष्कांकेचनमुक्तराः।शाक्तिपऽऽजांविनिंदंतिपुण्यलेशविवर्जिताः।वैदिकत्वाभिमानेनयेनिंदंत्यंबिकार्चनं।तेषामुत्पत्तिसांकर्य्यमत्युवनहसंशयः।श्रुतिस्मृतिपुराणादितात्पर्यज्ञानवर्जिताः।सदृशिकृपाहीनाःस्वयंपंडितमानिनः।नटनावेषभाषाभिर्नटवल्लोकरंजकाः।कर्मकर्मक्रियाकारयित्तत्वाविऽऽहणाः।हहस्यतिमत्तावारनिरताःपरवंचकाः।अहर्निशंबहिश्चित्ताःशिश्नोदरपरायणाः।ऽऽजीवनार्थंधीनवेदशास्त्रसंवादमानसाः।शठब्रह्मपरब्रह्मचित्तमाळामपेक्षकाः।यमाख्यैर्नियमाख्यैश्चाऽऽलैर्धर्मैर्विवर्जिताः।वैदिकावैदिकाचारविभागज्ञानवर्जिताः।अश्रौताचारसंपन्नाःश्रौताचा

स्संपन्नाःश्रौताचारपराभुवः।वेदसिद्धांमहादेवींमहादेवकुटुंबिनीं।आकाशादिजगद्रू
पश्चक्रिकांममजातरं।तत्पूजांविनिंदंतोनिर्दयाःपुरुषाधमाः।यापिशाचवेदिकाभासाद्।
श्यंतेबहवःकळौ।अन्येतुमुक्करतराशक्तिभक्त्यभिमानिनः।बुद्ध्यूर्वंपरित्यज्यवेदमार्ग
मनिंदितं।शाक्तंतंत्रंप्रशंसंतोदृष्यंतःक्षतिंसदा।शाक्ततंत्रोक्तदृष्टयोक्षादृष्टार्थदीक्षाविव
र्जिताः।दीक्षाभेदपरिज्ञानगंधलेशविवर्जिताः।आम्नायभेदानभिज्ञाःषडध्वज्ञानवर्जिताः।
प्रकाशज्ञानरहिताविमर्शज्ञानवर्जिताः।कळौविद्याध्वकोत्पत्तिज्ञानविवर्जिताः।मंत्रतं
त्रार्थभेदज्ञाःषाऽकाज्ञानवर्जिताः।चक्रतद्वासनाभेदपूजाभेदाविचक्षणाः।समयाचारवि
ज्ञानतद्दाचारविवर्जिताः।स्वशाक्तंगोपयंतःश्रोत्रनासादिहीनवत्।वेदोक्तवेषाभाषाद्यैर
ज्ञवैदिकवंचकाः।अभक्ष्यंभक्षयेन्नित्यमपेयंयःपिबेत्सदा।अगम्यागमनंकुर्यात्सयोगीना
चसंशयः।इतिस्वशास्त्रवाक्यानर्थज्ञानंवर्जिताः।लिंगोपरत्नाभिधमहाग्रहहृदयचंगताः।
वृथायानंप्रकुर्वंतोपरभार्यागामिनः।शाक्तिकोयाग्निसंदग्धालोकवेदबहिष्कृताः।आरोप्य

यंतःस्वगतामन्येषुपश्यंतांत्रमात्।वेदागमपरिभ्रष्टादृश्यंतेबहवःकळौ।अनेकजन्मसिद्धा
नांश्रेतस्मात्तानुवर्त्तिनां।[illegible]नेकप्रकारेणशाक्तिपूजारूपिभेवेत्।अनेकजन्मान्यारभ्यतं
त्रमार्गानुवर्त्तिनां।तंत्रोक्तेनप्रकारेणशाक्ति॰अनेकजन्मान्यारभ्यश्रेष्ठानांवेदतंत्रतः।वेदेन
तंत्रेणवानशाक्ति॰किंबहूक्त्यावैदिकोवातांत्रिकोवापिकश्चन।स्वस्योचितप्रकारेणनकळौशा
क्तिपूजकः।यद्यस्तिकश्चित्तंत्रोक्तप्रकारेणांबिकार्चकः।क्रमेणवेदमार्गेसःप्राप्नुयादेव्यनुग्र
हात्।यद्यस्तिकश्चिद्वेदोक्तप्र॰।तस्मिन्नेवशरीरेसमुच्यतेनात्रसंशयः।अपूजयन्महामोहा
न्महादेवकुटुंबिनीं।यःपूजयेन्महादेवंसतुपूजाविडंबकः।शाक्तिपूजाविहीनस्यपूजयेशो
नतुष्यति।अतःशाक्तियतेत्यादुःशिवेनसहवापथक्।पूजांग्रहीतुंनोशक्तःशाक्तिहीनःशिवस्त
तः।देवीमपूजयन्देवंपूजयन्नपिपूजकः।शक्तिपूजाविहीनेशपूजेशक्रोधकारणं।अतःश
क्त्याशिवंनित्यंपूजयेद्विधनाद्विदः।शाक्तिपूजाकृतायेनशिवस्तस्यप्रसीदति।शक्तिपूजाऽक
तायेनतस्मैकुप्यतिशंकरः।यत्रेशस्तत्ररुद्राणीयत्रोमातत्रशंकरः।उमाशंकरयोरैक्यंपश्यं

DR. BHAU DAJI

